भवेदिति॥६३॥ युक्त्यागमविरोधेन प्राप्तमत्राभिधीयते॥ बालरूढिं विनैवापि विद्वद्रूढिसमाश्रयात्॥६४॥ ततत्रामनएवैतत्तद
स्त्वभिमानिनः॥ संतितेषां विशेषेण शक्तिरन्येभ्य उच्यते॥६५॥ व्याप्तिश्चोक्तानुसारेण दृष्टं यंतेवाधिकारिभिः॥ शास्त्रोक्तवस्तु
नश्चैव बुद्धव्याप्तिः शास्त्रलिंगतः॥६६॥ व्युत्पत्तिः सा बलवती मूर्खव्युत्पत्तितो हि यत्॥ दृष्टयुक्तिविरोधे तु सर्वत्राचारदृष्टः॥६७॥
अल्पवाक्यं तु तायुक्तिबहुत्वे च विरोधिनी॥ यत्र तत्र कथं वस्तुनिर्णयः स्यादितीरिते॥६८॥ विरोधियुक्तिबाहुल्यादितिन्यायोवि
निश्चितः॥ युक्तेस्तु युक्तिबाहुल्यादितिन्यायोविनिश्चितः॥ मानमागमस्य च॥६९॥ कथं न निर्णयं कुर्यादित्यसत्कारणं न
हि॥ अत्यर्थो भवति क्वापि श्रुतिप्रायोपपत्तिभिः॥७०॥ अविरोधश्च तु र्थेतु पादेऽस्य स्वसमर्थ्यते॥ असत्कार्यं यथा दृष्टं वस्तु
त्वात्कारणं तथा॥७१॥ इति चेन्नहि वैधेकस्वरूपस्य न कर्तृता॥ बुद्धिपूर्वं प्रवृत्तिर्हि किंस्वित्त्वमिहानिश्चितं॥७२॥ नतिवे थात्म
कं त्वं तु भावस्याभावधर्मतः॥ धर्मधर्म्यैक्यतश्चैव न तु तन्मात्रता भवेत्॥७२॥ अभावस्य च भावोपि धर्मो थापि हि धर्मिणः
ताद्दृक्षमात्रतेहोक्ता बुद्धिसाहित्यमेव तत्॥७३॥ विशेष्यतेव धर्मित्वं प्रथमं प्रतिपत्तिषु॥ निषेधविधिरूपत्वं भावाभावत्व
मत्राहि॥७४॥ सर्वनाशेष्वपि सदा विशिष्टत्वाद्यस्य कस्यचित्॥ नाशोऽयं विमतोपि स्यान्नाशात्मकविशेषवत्॥७५॥ नचान्नाष

यदा दृष्टः परोद्भवः॥ २८॥ एतादृशात्वमन्यस्य वस्तुत्वं केन वार्यते॥ न च काचित्प्रमो मोक्षार्थे श्रुतिरेव प्रमा हि नः॥ २९॥ आप्तत्वमु
क्तमार्गेणाव्युत्पन्नैर्वोपपद्यते॥ अप्रमाणत्वमस्वतस्त्वस्य स्वीकारादपि माय्यिवत्॥ ३०॥ स्वोक्ता खिलनिषेधीस्यान् च कि चित्प्रसि
ध्यति॥ इदं चानीतनवद्गंवस्तुत्वात्प्रतिपन्नवत्॥ ३१॥ इत्येवं प्रतिषिद्धस्य केन मूलानुमा भवेत्॥ स्वतंत्रवृत्तीरचना सचेवाचेत
नेकुतः॥ ३२॥ अचेतनत्वस्वातंत्र्यमिति स्यात्प्रमाहतं॥ स्वेच्छानुसारितामेव स्वातंत्र्यं हि विदो विदुः॥ ३३॥ कुत इच्छाचेतनस्य
सेच्छचेत्किमचेतनं॥ इच्छाम्यहमिति ह्येव निजानुभवरोधतः॥ ३४॥ अचेतनेच्छा पगता यदि भेदग्रहो त्र च॥ कथं स न यटस्य स्य
न्मनो महति भेदतः॥ ३५॥ मनसोपि गृहीतत्वादुत्पत्त्यात्मकतायतः॥ कामस्य तु मनः काम प्रियाप्रियविभेदतः॥ ३६॥ द्वैवि
 ध्यं दृश्यते चास्य तस्मादिच्छाय हः कुतः॥ रचनानु पपन्नेस्त न सर्वज्ञानुमागतं॥ ३७॥ अचेतनं जगत्कर्तृ पयो दिवनोपमा॥ बा
युतस्तन्निशिवचनाच्चेतनाचेतनस्य च॥ ३८॥ द्वैविध्ये पितु कामादेः कुतः स्वामित्वमात्मनः॥ साक्षादनुभवारूढं त्वात्स्य
पोदितुं क्वचित्॥ ३९॥ इच्छास्वामित्वमेवो क्त मिच्छावत्वं न चापरं॥ किंचित्तदन्नागत्वेपि स्वामित्वं लोकवद्भवेत्॥ ४०॥ सवा २३
त्मतंत्रकामादेः किमु तैव परेशितुः॥ न चानुभवगं काम स्वामित्वं वेदवागपि॥ ४१॥ शक्यापूर्वदितुं तस्मात्सा तद्वन्याभि
धायिनी॥ मोक्षकामोभवेदन्यो यदि मुक्ताङ्क्षिवित्यतः॥ ४२॥ मोक्षकामस्य किं तेन स्व नात्मार्थं नैको यतेत्॥ कर्तृत्वं यस्य

व
तस्यैव भोक्तृत्वमुपलभ्यते॥ ४३॥ तं च विभागोन्वतयोर्मानं नैव किंचित्क्वचिद्भवेत्॥ सर्वमानविरोधैकदुर्दशा दीक्षितस्य
यं॥ ४४॥ मायावाद्युयमायायातत्वं शब्दान्निराकृतः॥ सांख्यस्तु सेश्वरो ब्रूते क्षेत्रानुग्रहशक्तिमान्॥ ४५॥ अक्लीश्वरः
स्वयं भातः क्लेशकर्मादिवर्जितः॥ क्षेत्रशक्तिमती सैव ब्रह्मतिबद्धजशक्तिमान्॥ ४६॥ जीवः पर्जन्यवद्देवशक्तिमानी
श्वरः स्मृतः॥ पृथिवीवत्प्रधानं तज्जीवसन्निधिमात्रतः॥ ४७॥ बीजावपनकर्त्रेवत्सत्र ग्रहस्वयंप्रभुः॥ अन्यत्र कापि शक्ति
न स्यात्तेश्वरो शरवहि॥ ४८॥ शास्त्रोक्तौ प्रेरयत्यं जगत्तदधीनाश्च सर्वदा॥ सत्ताप्रधानपुरुषशक्तीनां च प्रतीतयः॥ ४९॥
प्रवत्तयश्च ताः सर्वाः नित्यनित्यात्मनायतः॥ यथा नित्यतया नित्यं नित्यशाक्त्यास्त्वयेश्वरः॥ ५०॥ नियामयति नित्यं च
रुते त्वदिति श्रुतेः॥ स्वभाव जीवकर्माणि द्रव्यं कालः श्रुतिः क्रियाः॥ ५१॥ यत्प्रसादादिमे संति न संति यदुपेक्षया॥ इ
तिश्रुते न सता द्याप्यपि नाराय णं विना॥ ५२॥ तत्पतंजलि विंध्यादिमतं न पुरुषार्थदं॥ चार्वाकैरुच्यते मानमक्षजं नाप नं
क्वचित्॥ ५३॥ देह आत्मा पुमर्थश्च कामार्थाभ्यां विना न हि॥ यद्देवदर्शनेनास्य को र्थः प्रत्यक्षगोचरः॥ ५४॥ लभ्यते
नेवहि नरैः शास्त्रात्किं मोहनं विना॥ स्वपरार्थो विहिनत्वात्स्वमते नैव निष्फलं॥ ५५॥ किमित्युन्मत्तवच्छास्त्रं वृथा प्रलपति
स्वयं॥ देहादन्योनुभवतः आत्मा भाति शरीरिणां॥ ५६॥ ममदेह इति व्यक्तं ममार्थ इतिवत्सदा॥ प्रत्यक्षस्यैव मानत्वमिति

केनावसीयते॥५७॥ यदितत्साधकं वेदप्रामाण्येन कथं भवेत्॥ नचान्यामानताक्कापिप्रमाणेनवसीयते॥५८॥ एवमेतेनार्थर
हितउपेक्ष्यः पक्षईदृशः॥ सन्निधानाच्चेतनस्यवर्त्ततेयद्यचेतनं॥५९॥ तथाप्यबुद्धिपूर्वत्वादस्य दोषः समो भवेत्॥ अंगीकृतपु
रुषस्यैवसर्वैरप्यनुभूयते॥६०॥ तदंगत्वोक्तितश्चैवस्यात्सर्वस्यापलापकः॥ किमुसर्वेश्वरस्यास्यह्यपलापाद्यतोऽखिलं॥६१
ह्यंगीकृतं यदितस्यैवस्यात्तं त्र्यं चेभ्रचारिखिलं॥ तत्प्रेरणेप्यनाकृत्वात्स्यात्तंत्रेन्योन्याश्रयपक्षितः॥६२॥ नचस्यात्तत्र्यमस्यैव
२२ प्रत्यक्षादिविरोधतः॥ हिताक्रियादिदोषाच्च षड्जनानीश्वरंमतं॥६३॥ संसारिणोन्यं सर्वज्ञं सर्वशक्तिमनोपमं चेतनाचेत
नस्यास्य सृष्ट्यादेरुदधीनतां॥६४॥ नांगीकुर्वन्तियेतेषां सर्वेषां चसमाश्रमे॥ तस्माच्छ्रुतिप्रमाणेनयुक्तिभिश्चपरोहारिः॥६५
अंगीकार्यतमोनित्यः सर्वैरपिसुनिश्चितं॥ नित्यज्ञानप्रयत्नेच्छासंख्याद्यैरपिपंचभिः॥६६॥ युक्तमीशं वदंतो न्येतदिच्छा
दृष्टिचोदिताः॥ परमाणवश्चतुर्वर्गाः संयुज्य तेद्विशो खिलाः॥६७॥ परमाणुद्वयेनैव द्व्यणुकं नामजायते॥ द्व्यणुकत्र
येणात्र्यणुकं तैश्चतुर्भिस्तदात्मकं॥६८॥ ततस्त्व नियमेनैवखंडावयविनाशवः॥ ततश्चानियमेनैवसर्वावयविसंभवः॥६९ २२
कारणंसमवाय्याख्यं परमाणवादिवत्रहि॥ ईशेच्छादृष्टकालास्तु निमित्तकारणं मतं॥७०॥ सामान्यं त्वविशेषौच समवायश्च
तत्त्रयं॥ नित्यक्रियाश्चनित्याश्चगुणद्रव्यद्विरूपके॥७१॥ कार्येगुणक्रियाणांतु समवाय्यपकारणं॥ करणस्था गुणाद्यास्तुसं

श्रीगुरुभ्योनमः॥ ॥स्मृतियुक्तिश्रुतिगुणायुक्तयोबहुयुक्तयः॥११४॥ एवंचतुर्विधानैवविरुध्यंतेन्चयंप्रति॥ इतिप्र
थमपोदननिपात्रितेषुभियोगतः॥११५॥ दर्शनानांप्रवृत्तत्वान्मंदत्रात्रांकलेपुनः॥ अनादिकाले तोवत्ताः समयाह्रिप्रवा
हतः॥१६॥ नचोच्छेदोस्तिकस्यापिसमयस्यत्यतोविभुः॥ भ्रांतिमूलत्वमेतेषांपृथग्दर्शयतिस्फुटं॥१७॥ तर्केहेतवमे
रेववाक्येश्चागमवादिनां॥ दौर्लभ्याच्छुद्धबुद्धीनां बाहुल्यादल्पवेदिनां॥१८॥ तमसत्वाच्च लोकस्यमिथ्याज्ञानप्रसक्ति
तः॥ विद्वेषासरमेतत्वेतत्ववेदिषुचानिशं॥१९॥ अनादिवासनायोगादस्फुरणंबहुत्वतः॥ दुराग्रहगृहीतत्वाद्वर्ततेसम
याः सदा॥२०॥ तथापिशुद्धबुद्धीनामीशानुग्रहयोगिनां॥ सुयुक्तयस्तमेहन्युरागमानुगताः सदा॥२१॥ इतिविद्या
पतिः सम्यक्समयानांनिराकृति॥ चकारनिजसक्तानांबुद्धिशाणात्तसिद्धये॥२२॥ चेतनाचेतनंतत्त्वद्वयमेवनिरी
श्वराः॥ आहुरुतत्त्वंपंचत्वविभागरूपमचेतनं॥२३॥ चेतनंतदसंख्यातंभिन्नमन्यद्विदोखिलं॥ अचेतनस्यकर्तृत्वंस्वा
तंत्र्येणनिग द्यते॥२४॥ परस्परविभेदश्चकार्याणामन्वयंभवेत्॥ भोक्तृतांचेतनस्याहुः केचित्तामपिनापरे॥२५॥
स्वरूपचेतनबलात्स्वप्रकाशाच्चयोगितां॥ प्रकृतेश्चस्वरूपस्यविवेकायहमेवतु॥२६॥ अभोगवादिनोभोगमाहुर्भेदयि
हात्तयोः भोगिनामुक्तिरुद्दिष्टासएवाभोगवादिनां॥२७॥ ईश्वरस्यासंग्रहदेव नयुक्तौतावुभावपि॥ चेतनेच्छानु सारेण
॥

तरूपलभ्यते॥ ८५॥ अन्यदेवह्यनंतत्वंमहत्वाणुत्वयोः समं॥ बहुत्वाल्पत्वयोर्यद्वत्संख्यायामुपलभ्यते॥ ८६॥ अत्येनंमेक
भागानांतावत्वेयेवगण्यते॥ अणीयांश्चमहीयांश्चभगवानाग मोदितः॥ ८८॥ आनंत्यवाचकश्शब्दोद्विधानंत्यपिमानं ता
यातिनेवगुणाल्पत्वंकालाल्पत्वंचमानगं॥ ८९॥ सर्वकालगतस्याल्पकालेपिस्यादवस्थितिः॥ महागुणस्यचाल्पेपि
गुणस्यादितिचेद्भवेत्॥ ९०॥ तावत्वमेवनैवस्याद्देशेय्येतन्ननोमतं॥ महतोल्पत्वमपिहिव्योमवत्साहवेदवित्॥ ९१॥ यद्यल्प
२३ देशसंस्थानेनसर्वत्रापिनोभवेत्॥ स्थितस्यत्वल्पदेशेषुसर्वगत्वंभवेद्ध्रुवं॥ ९२॥ एकत्राप्यनवस्थस्यकुतएवाखिलस्थ
शू तोसून्यत्वमेवतस्यस्याद्यस्यैकत्रापिनस्थितिः॥ ९३॥ अतोनाणुत्वविश्रांतिर्नमहत्वस्यवाक्वचित्॥ उभयानंत्ययुक्त
स्माद्यदिमुख्यंमहद्भवेत्॥ ९४॥ तच्चब्रह्मपरंसाक्षात्सर्वानंत्ययुतंसदा॥ यदिसाक्षीस्वयंभातोनोमानंकेनगम्यते॥ ९५॥ अस
जादेश्चमानत्वमनवस्थान्यथाभवेत्॥ अतः सर्वपदार्थानांभानः संस्थेवसर्वदा॥ ९६॥ सर्वादिष्वपिसंबंधौविभागःपराणुत २३६
तत्संयोगादनियतात्पदार्थानांजनिर्भवेत्॥ ९७॥ द्वयोरेवतुसंयोगइतिकेनावसीयते॥ कारणस्यगुणास्तेनभवेयुः कार्यगा
अपि॥ ९८॥ तारतम्येनसर्वेपिमहांतश्चाणवोयतः॥ नचतत्रोक्तसख्येतुमानंकेवलकल्पना॥ ९९॥ कथंसाक्षिमितस्या
स्यन्नाक्षुयाद्धारणेक्वचित्॥ यदिसाक्षिमितंनैतन्नानुमातत्रवर्त्तते॥ २००॥ पक्षीकर्तुमशक्यत्वात्कुतएवानुमाभवेत्॥

यत्रनास्तिपदंन्यासःकथंविषयमाप्नुयात्॥ २०१॥ देशांतरादिशब्दाश्चशृंगादिशब्दवत्॥ सहदृष्टंचसजातीयंनास्मत
क्षेत्रिमेवहि॥ २॥ येनैवचप्रकारेणात्पासिद्धमनुमीयते॥ तेनैवनृशृंगादेःशक्यमस्तित्वकल्पनं॥ ३॥ प्रत्यक्षागमो
वापिभवेद्यत्रनियामकः॥ सैवव्याप्तिर्भविन्मानेनान्यासंदिग्धमूलतः॥ ४॥ सहदर्शनमात्रेणनव्याप्तिरवसीयते॥ यदे
ति वर्यो रेकेस्यद्दक्षजंवागमोभवेत्॥ ५॥ तान्निर्धारितयुक्तिर्वव्याप्तिः सेवसरानहि॥ अन्यथासमरसभावोप्यनु
मयापतेत्॥ ६॥ अनिष्टानिचसर्वाणिह्यनुमाकामचारिणी॥ कार्यकारणयोश्चैवगुणादेःपंचकस्यच॥ ७॥ भिन्नत्ये
वतुसंबंधः समवायोन्यईयते॥ भिन्नत्वसाम्यतस्तस्यताभ्यांयोगोभवेद्ध्रुवं॥ ८॥ सखनिर्वाहकश्चेत्स्याद्द्रव्यमेवतथानवि
शेषरत्नदृतत्वादिर्युद्धिभिर्नेवसीयते॥ ९॥ गुणक्रियादिरूपस्यनिषेधः केनहेतुना॥ द्रव्यमेवततोनंतविशेषात्मतयास्
तु॥ १०॥ नानाव्यवहृतेर्हेतुरनंतत्वंविशेषतः॥ विशेषश्चविशेषीसखैनेवसमवायवत्॥ ११॥ कल्पनागुरुतादोषा
त्पदार्थांतरतानहि॥ कल्पयित्वाषट्पदार्थांस्ताभावानपिकेवलं॥ १२॥ एकस्मिन्नसविशेषश्चेत्किंपूर्वतस्यविस्मृतिः
येनप्रत्यक्षसिद्धेनव्यवहारोरविलोभवेत्॥ १३॥ भावाभावविभागेनयेविनानकथंचन॥ एतादृशोविशेषस्मिन्कोद्वेषो
वादिनाभवेत्॥ १४॥ अभेदेनप्रतीतिश्चकार्यकारणपूर्वके॥ अभावांतेपदार्थेस्तिनविशेषोवसीयते॥ १५॥ सामान्य

दिपदार्थेषुतन्निष्टत्वादयोखिलाः॥ कथंधर्मोनिवार्येतवस्त्वैक्येपिहिवादिभिः॥ १६॥ कार्यस्यतत्तन्निष्टत्वंगुणादेव्यापितादि
कः॥ कथंविशेषोनेवास्तिसचधर्मेपिरोयदि॥ १७॥ षट्पदार्थीतिरिक्तस्यात्पदार्थानियमपिहि॥ धर्मस्यधर्मसंतानादनवस्था
करोभवेत्॥ १८॥ सामान्यस्यापिसामान्यगुणस्यापिगुणोप्युतः॥ नांगीकृतश्चसचयदिनानवस्थाक्वचिद्भवेत्॥ १९॥ अस्म
त्पक्षेगुणाधाराश्चतद्वतोहिविशेषतः॥ अनन्यत्वान्नानवस्थाभेदोनाशेपरेवितथा॥ २०॥ विशेषमेवसंश्रित्यविशेषोबलवान्यतः॥
२४ दृष्टिप्रमाणतश्चैवविरोधोदर्शनेकथं॥ २१॥ विरोधोह्यविरोधश्चयतोदर्शनमानकौ॥ ततोदृष्टेविरोधस्तुसद्भिरापाद्यतेक
थं॥ २२॥ अस्तिनास्तिभगवान्खेनांतदन्येनविभेदवान्॥ नित्याधर्मस्तिदीयास्तुसर्वेस्मान्नेवभेदिनः॥ २३॥ सामस्त्योच्छेदिनो २४
न्यत्रधर्माउभयरूपिणः॥ भावितएवस्योच्छेदात्तदन्येचसमस्तताः॥ २४॥ अंशांशिनोरभेदेनत्वंशसंयोगएवहि॥ अंशि
नोनानवस्थातोयद्यप्यंशेष्वविश्रमः॥ २५॥ एकस्मिन्जालएवान्यः संयोगोजायतेयदि॥ अनवस्थातदेवस्यात्संयोगेक्ये
भवेत्कुतः॥ २६॥ अंशसंयोगहेतुश्चहेतुकासानवस्थितिः॥ यद्यंशगोनसंयोगः कार्येषुप्रथिमाकथं॥ २७॥ परमाणोर
णोर्नास्तिमहत्त्वेत्यणुत्वंचवः॥ अणूनांप्रथिमापेक्षंविनैवत्र्यणुकेपिसः॥ २८॥ परमाणोर्महत्त्वंचविनैवेत्यतदूचः कथं॥ अंशि
नोंशैरभेदोयमंशे नैतुभिदांशिदा॥ २९॥ सर्वप्रत्यक्षविषयः कथमेवह्यपोद्यते॥ संयोगश्चविभागश्चभेदश्चैवपृथक्त्व
थक्॥ ३०॥

योगोद्व्यकारणे॥ ७१॥ एवंस्थितेपिसिद्धांते विशेषस्तत्रकल्पितः॥ घ्यणुकेपरमाणौचहृस्वत्वंपरिमंडलं॥ ७२॥ नकारणंका
र्यगुणेवैरूप्यतत्रकारणं॥ इत्याहुस्तेनथोवाचविद्याधीशः स्वयंप्रभुः॥ ७३॥ महत्त्वंचैवदीर्घत्वंत्र्यणुकाद्येषुकल्पितं॥ तस्मा
त्सदृशंकार्येतत्कार्येष्वपजायते॥ ७४॥ यथातथैवन्हस्वत्वात्पारिमांडिल्यतोपिहि॥ जायेतसदृशंकार्येपरिमाणंसमन्त
तः॥ ७५॥ नचेन्महत्वतश्चैवदीर्घत्वादपिनोभवेत्॥ सदृशस्यहिकार्यस्यनेवयोगः कथंचन॥ ७६॥ अप्रत्यक्षत्वमेवस्या
द्यतः कार्येष्वणुत्वतः॥ उतिचेन्नमहत्वंचपरमाणावणावपि॥ ७७॥ कथंत्र्यणुकपूर्वेषुनाणुत्वमपिकथ्यते॥ प्रत्यक्षत्व
तदन्यत्वेपुरुषापेक्षयाखिले॥ ७८॥ अणुत्वंचमहत्वंचयतोवस्तुव्यपेक्षया॥ तारतम्यस्थितायस्मात्पदार्थास्सर्वएवच॥
॥ ७९॥ यथामहत्वविश्रांतिस्तथाणुत्वस्यचेष्यते॥ परिमाणत्वतश्चेन्नमहत्वस्यापिविश्रमः॥ ८०॥ दृश्यतेनंतइत्येव
तथानंतमणावपि॥ नमहत्वगुणातत्त्वावानितिह्रीश्वरः॥ ८१॥ परिच्छिन्नस्तथालेश्वनैतावद्गगताक्वचित्॥ विश्रांतो
यथनंतांशः कश्चिदस्तीतिगम्यते॥ ८२॥ नावसाययितुंशक्योविरोधादेवकेवलं॥ केवलंसाक्षिमानेनकालोदेशोपिनो
तवान्॥ अपर्यवसितिश्चाणोर्दृश्यतेसाक्षिणाह्ययोः॥ यदिनोसाक्षिगम्यंतत्[illegible]केनगम्यते॥ ८४॥ विश्रांतिस्तारतम्येनदृश्य महत्वे
तेह्यनुमानतः॥ यद्यागमादनंतंतन्महत्वमवगम्यते॥ ८५॥ अनंतमेवचाणुत्वंकुतोनेवावसीयते॥ महत्वात्पत्वयोनैवविश्रां

र्थएवकः॥ समवायोयदित्वस्यचैकत्वात्सिद्धसाधनं॥४६॥ यद्यस्योपाधिकोभेदः कुतएकत्वमिष्यते॥ नानैर्वाच्यं हितेनेष्टमत
श्रोपाधिकान्ययोः॥४७॥ सत्यत्वात्कोविशेषस्यान्मायावायन्यथाभवेत्॥ उपाधिजन्यंतद्रूप्यमितिचोपाधिकंभवेत्॥४८॥ उभय
त्राप्यनंतास्युःसमवायास्ततस्तत्॥ भिन्नत्वंचैवतेष्वस्तिकोविशेषउपाधिकैर्गुं॥४९॥ अविद्यमानएवान्यःसमवायोधिगम्यते॥ उ
पाधिनातद्रूपकमनुमानेनमाभवेत्॥५०॥ एवमेवासत्तः सतासमवायोजनिर्मितः॥ तत्रापिद्धक्रुदोषाणांनैवकिंचिन्निवारकं॥५१॥
अस्मात्पक्षेविशेषस्यसर्वत्रांगीकृतत्वतः॥ नास्तिदोषकश्चिद्वोद्ध्यभावश्चसएवहि॥५२॥ अभावस्यचधर्मास्युर्भविात्वेपंनु
तेखिलं॥ प्रत्यक्षमानतः सर्वमेतन्नोवारणक्षमं॥५३॥ सर्वेभावाअभावाश्चपदार्थाखिलेनसर्वदा॥ तथापिप्रथमंबुद्धे योनिषेधस्यगो
चरः॥५४॥ सोभावोविधिबुद्धेस्तुगोचरः प्रथमंपरः॥ तस्मात्प्रध्वंसभेदादिसदित्येवावगम्यते॥५५॥ आरोप्यभावोविध्वंसोदेह १ सं २ लि
भावश्चपरस्मता॥ इत्यादिर्युज्यतेसर्वंप्रत्यक्षादिप्रमाणतः॥५६॥ अन्यो न्याभावोभेदोचपृथक्त्वंचपृथक्पृथक्॥ यत्त्व व
त्स्यंतितद्भेवकल्पनागौरवाद्भुतं॥५७॥ पर्यायत्वेभतेशाब्दापायतेसर्वएवहि॥ भेदस्यतुस्वरूपत्वेयेवदंतिचशून्यता॥५८॥
अद्भुतास्ते यतोन्यस्यप्रतियोगित्वमिष्यते॥ प्रतियोगिनोहिभेदोयंनतुस्वस्मात्कथंचन॥५९॥ विभागेनात्मतेषस्यात्कुतएवच २५
शू न्यता॥ नशून्यानाहिसंयोगाद्भावोवस्तुनइष्यते॥६०॥ विदारणार्थधातुश्चविभागुणवाचकः॥ अविदारणे पियास्यस्य

क्य
भिन्नावौशेतुतस्यच॥६१॥ अतउन्मत्तवा त्वान्मायावादोद्युपेक्षितः॥ नचामंदसदानंदस्वंघनंतगुणार्णवः॥६२॥ ईश्वरोष्ट
गुणत्वेनप्रमेयोप्रमितत्वतः॥ मप्यनंतगुणेनंतेगुणेलोनंतविग्रहे॥६३॥ अनंतगुणमहात्म्य स्वानुगुणार्णवः॥ नारायणः
परोशेषचेतनेभ्यः परंपदं॥६४॥ इत्यादिवेदतद्वाक्येनंनंतेश्वावसीयते॥ अनंतगुणतांविष्णोः कथमेवह्यपोद्यते॥६५॥
त यद्यनंतविशेषाश्चतद्भानादेर्निवारिताः॥ कथंतेद्विषयता सार्वज्ञार्थविधीयते॥६६॥ औपाधिकविशेषस्तुपूर्वमेवनिराकृ
तः॥ स्वप्रकाशत्वमपितुयेज्ञानस्यनिवारितं॥६७॥ कथंसर्वज्ञतातस्यस्वज्ञानाधिगमंविना॥ ज्ञानंविन्धाधिवांलेकंतद्भानविषय
परं॥६८॥ इतिज्ञानद्वये नैवसर्ववित्परमेश्वरः॥ इतिचेदेवमेवार्थेस्तद्भानावसितोयदि॥६९॥ स्वप्रकाशत्वमेवस्याद्भानद्व
स्व तद्विशेषणं॥ ज्ञानांतरंचेदत्रभवेदेवानवस्थितिः॥७०॥ प्रकाशत्वमेतस्मादुनिर्वारंसमापतेत्॥ सुखवान्दुःखवांश्चस्या
दितिव्याप्तिश्चनोभवेत्॥७१॥ निर्दुःखत्वंमहानंदश्रुत्यैवेन्द्रस्यभण्यते॥ योशनायपिपासेचशोकादीश्चातिवर्तते॥७२॥ आ
नंदंब्रह्मणोविद्वान्बिभेत्यादिकाचसा॥ ईश्वरस्यत्वष्टेथेष्टत्वंदुःखित्वोपाधिरिष्यपि॥७३॥ उक्तोकिमुतरंब्रूयाच्छुत्यनादरत
त्परः॥ नचात्मदुःखिते स्यादतश्शतभिवार्यते॥७४॥ सहदर्शनमात्रेणश्रुतीनामपलापकः॥ यज्ञोदरपिपाप खहेतुखंहि
छो

सयायुते:॥७५॥ नानुमाभिः कथंतत्रयद्वदुपाधिर्निखिध्यत॥ अदुखित्वेनचानुक्तिः कथंनोपाधितां व्रजेत्॥७६॥ अदुखमित
रतस्तु र्वर्जी वा एवतुदुखिनः॥ तेषांदुःखप्रहाणाय श्रुतिरेषाप्रवर्त्त ते॥७७॥ इतिश्रुतिर्हि परमा श्रुतिं त्यक्त्वा कि येदिकारणं॥ किं
कार्यमनुमानेनगल सम्यक्संभेनहि॥७८॥ अनुमानेनयद्यर्थः श्रुतदृष्टोप्यपोह्यते॥ एवंमुक्तेनप्रकारे णानेश्वरो धर्मएवच॥७९॥
२६ स्यात्तत्फलं च तेनात्र श्रुतिरेवप्रमाभवेत्॥ इत्यास्यानुमयासिद्धेः श्रुतिर्धर्मेप्रमाभवेत्॥८०॥ तयासर्वगुणैः पूर्णोऽपि कइ शोयतस्तु
तः॥ अनानंदानुमानस्यधर्मग्राहिविरोधतः॥८१॥ नप्रमाणं भवेत्तस्मादानुमात्रोपयोगिनी॥ नित्येच्छत्वात्परेचास्यपरमा वेदो
एकसदात्वतः॥८२॥ अदृष्टकालयोश्चैवभावात्कार्यंसदा भवेत्॥ नहिकालविशेषास्तित्वपक्षेसम्मतेहरेः॥८३॥ विशे
षकालएवेतत्सृष्ट्यादीच्छा सनातना॥ विशेषाश्चैवकालस्यहरेरिच्छावशाःसदा॥८४॥ सर्वेनिमेषा इतिहिश्रुतिरेवहिसाद
रं॥ उदीरयतिकालाख्यांशक्तिमित्यस्यवागपि॥८५॥ कालस्यकालरूपत्वेननविरोधोपिकश्चन॥ असंख्याताविशेषत्वा
दीच्छाया अपिसर्वदा॥८६॥ ईशोदेशश्चकालश्चस्वगताएवसर्वदा॥ ईशाधीनोचतौनित्यंतदाधारोचतद्गतौ॥८७॥ इति २६
श्रुतिरपिप्राहलोकाख्योहिहरेरवत्॥ तत्कालसृष्टिमेवातोवाञ्छतीशःसदैवहि॥८८॥ स्यात्कालःसततंदेवेतिकालस्यस्वगत
त्वतः॥ स्वभावादेवहीच्छेषादेव सोपरतिश्रुतेः॥८९॥ स्वपक्षावोपिपरेशेच्छावशाइत्यदितः पुरा॥ नित्या अनित्याश्चततस्तदधी
नइतिश्रुतिः॥९०॥

अन्योन्यप्रतियोगेनतद्वयोरपिदृश्यते॥ भिन्नाइतितुभेदानांसमुदायोहिदृश्यते॥ यथैवचपदार्थानामनयोर्भेदइत्यपि॥३२॥ इ
तोमुख्यत्वतोप्यस्यभेदो हीशेहिधर्मिकः॥ तत्रैकवचनंयत्तद्द्विप्राणां भोजनंयथा॥३३॥ नरत्वादिकमप्येवंततधर्मतयैयते॥
नसर्वधर्मएकोस्तिसमुदायस्तुभिन्नगः॥३४॥ एतादृशाच साहृत्यंपदार्थेषुपृथक्पृथक्॥ एकस्मिंस्तविनष्टेपि तोन्या य
त्रैवदृश्यते॥३५॥ कुतोभस्मत्वमासस्यनतत्वंपुनरिष्यते॥ एकत्वेनास्तिमानंच श्रुतिरप्याहसादरं॥३६॥ भिन्नाश्चभिन्न
धर्माश्चपदार्थाअखिलास्त्वपि॥ स्वैःस्वैर्धर्मैरभिन्नाश्च स्वरूपेरपिसर्वशः॥३७॥ अनिवृत्तविशेषानाशास्तु धर्माउभयरूपकः॥
नकेनचिदभिन्नोलाभगवान्स्वगुणैर्विना॥३८॥ इतिव्युत्पत्तिरपिहि साहृत्र्येणैवगम्यते॥ सर्वेषुयुगपच्छब्दः सदृशेषुप्रवर्त्त
ते॥३९॥ तथापिप्रासितस्त्वेकवचनात्तुविशेषतः॥ अभीष्टावगतिश्चस्याच्छक्तिः साहृत्र्यगायतः॥४०॥ तादृशो
यंचतच्छब्द इति ज्ञापयतिस्फुटं॥ जाति श्चेत्कथंतासुतत्रचेदनवस्थितिः॥४१॥ तथैवव्यक्तिविज्ञानंव्यक्तित्वाभा त
ज्ञा वदूषितं॥ यदितच्चास्तितस्यापिविशेषेष्वनवस्थितिः॥४२॥ कथंस्वरूपत्वमपिज्ञायेतेनुगतंयदि॥ एकव्यक्तत्वात्तोपर्यं
तमेनवस्थादिदूषितं॥४३॥ कल्पनागौरवात्तेनयुक्तानानुगकल्पना॥ औपाधिकविशिष्टाद्यमपितद्वत्तुकिंततः॥४४॥
अन्यत्तदेवचेद्दग्निमत्वंकिंतत्रभण्यते॥ अग्निसंयोगमात्रंचेद्भवेत्तत्सिधिसाधनं॥४५॥ भूधरस्याग्निसंयोगोयदिस्यात

प्यनु

सर्ववस्तुषु॥ फलादीनां विशेषेण सर्वत्रानुमीयते॥५॥ सत्वेन क्षणिकत्वं चेदाक्रान्तस्या विशेषतः॥ अविशेषोखिलस्य
पि सत्वात्किं नानुमीयते॥६॥ यथा क्षणिकस्य सत्वेन कुतएव नरादिषु॥ सधर्मि प्रतियोगित्वमभावस्य नियामकं॥७॥
तौ विनानत्प्रभावश्च क्वचिद्दृष्टः कदाचन अधर्मिप्रतियोगित्व कोमंशस्यावगम्यते॥८॥ स्वीकारस्यागतो दृष्टद्वयोः सर्वव ५
स्तुषु॥ गुणानुन्मतएवासौ विद्धात्यधिकं पुनः॥९॥ उत्तरोत्पत्तिमात्रेण विनाशात्पूर्ववस्तुनः॥ नसंस्कारार्थकत्वं च यु
२७ ज्यते कस्यचित्क्वचित्॥१०॥ अतो जातमयेत्यादिनन्वेयमनुमा कुतः॥ एकत्वमनुभूतिस्थं त्यक्त्वा निर्नानिका भिद॥
लपे ११॥ कुतआत्मादिकेषुस्याद् [illegible] वानुभवेयलः॥ कार्यकारणयोश्चैककालीनत्वं विना कथं॥१२॥ पूर्वसंस्कारयो
गौ स्यादुत्तरो नियमेन च॥ संबंधाएव संस्कारमन्यत्राद्यथलेखिलाः॥१३॥ असंबंधं कथं पूर्वोत्तरे वासनाकरः॥ एककालतयायो
गं विना संस्कारतः कथं॥१४॥ क्षणमात्रमवस्थानं स्वीकृतं सर्ववस्तुषु॥ पूर्वमध्यापरकल्परहितलक्षणमुच्यते॥१५॥ पूर्वभावभ
वं कार्यमुत्तरं तन्नाशसंभवं॥ योगपद्यं सति भवेद्दुत्पाद्यानामशेषतः॥१६॥ विनाशे चेन्नतत्कार्यं कोयं क्षित्ौ च कारणमा॥ अभेदेपि वि २७
शेषेण देहदीपफलादिषु॥१७॥ विशेषदर्शनं युक्तमस्माकमनुभूतितः॥ विशेषदर्शनं मानं यदि नस्थैर्यं कुतः॥१८॥ दिरवस्तु
त्वे चरचदृष्टांताङ्क वो सञ्चेत्क चिद्भवेत्॥ विश्वं प्रत्यक्षगं त्यक्त्वा लयो येनानुमितं वदेत्॥१९॥ मायावादिवदेवासादुपेक्ष्योभ्रीतिमिच्छत॥

५ उक्तीतदिशाकान्ततः॥ वक्ततश्चान्तदस्मीतिनिस्योपासापत्रोक्षिता॥ नागादिदो धनहितेः

सर्वप्रमाणसिद्धं यद्बुद्धेर्भेदेन सर्वदा॥२०॥ कथं तु तस्य बुद्धित्वं विश्वमन्यत्र किंप्रमांसर्वलोको विभेत्यजो यस्मादनुभवं तदा॥२१॥
तस्यापलापिनं किं न निष्प्रमाणकवादिनः॥ सोहं तदिदमेवाहं स्फुरवी सद्गगनं दिशाः॥२२॥ सत्याद्भुत्याद्यनुभवाः सदा तत्प्रतिपक्ष
गाः॥ अतो निर्मनिमारिवित्प्रमाणप्रतिपक्षगं॥२३॥ दुर्मतं कोनुपृच्छीयाद्विनाशरूपतां लिंगाचित्॥ अपरः शून्यमखिलं मनोवाच
मगोचरं॥२४॥ निर्विशेषं स्वयं भातं निर्लेपमजरामरं॥ अशेषदोषरहितं तद्भावयोगिनां [illegible] तु॥२५॥ तस्यैवानादिसंवृत्याना ना नये
भेदात्मकं जगत्॥ सदिवाभाति सत्यत्वं सा वलंलक्ष्यं चेष्यते॥२७॥ परमार्थिकसत्यत्वं शून्याद्दन्यस्य न क्वचित्॥ सांवृतेनैव सत्वेन
व्यवहारोखिलोभवेत्॥२८॥ शून्यात्संवृतियोगेन विश्वमेतत्प्रवर्तते॥ सृष्टिकालेपुनश्चान्तो स्तिमितं शून्यतां व्रजेत्॥२९॥ र
तिब्रूते तमुद्दिश्य जगाद्जगतां गुरुः॥ नासतो जायते भावो न हि दृष्टासतो जनिः॥३०॥ स्तिः क्वचित्प्रमाणं च दृष्टिरेवाखिलाह
र॥ ये येवं ससमरसान्मधुरादिवपीनता॥३१॥ भवेज्जनस्य मार्जारश्चंगं गोरिवद्यालकं॥ कार्यार्थी कारणं सञ्जनोपादद्यात्कथं
चन॥३२॥ नश्वरं तेति चेष्टायश्शून्यादेवेष्टसंभवात्॥ दिशाकालादि नियमो न हि शून्यात्सतो भवेत्॥३३॥ पुरुषेच्छानुसारेण यदि कि
चित्प्रजायते॥ किं नानुमीयते तद्वद्वस्तुत्वात्पुरुषोद्भवः॥३४॥ सर्वस्यापि न चाभावो विश्वं सदिति गम्यते॥ यतोनुभवरोधेतु वचनं वा
दिनः कुतः॥३५॥ खप्रख्याति वदेवेदं संवृत्ये वोपलभ्यते॥ यदि सत्वेन किं चात्र भ्रमो नैव निवर्तते॥३६॥ अनादेरस्य विश्वस्य नित्यत्वं निय
दि चेष्यते॥ निवृत्तिश्च निरर्थेतत्स्यात् भ्रान्तित्वसंभवात्॥३७॥ दृष्टस्य भ्रान्तितां चेत्स्यादृदृष्टेन भ्रमः कुतः॥ गवाम शृंगाभवे नन

हिस्याच्छन्नाश्रंगित ॥ ३८ ॥ अस्माकं तु प्रमाणेन प्रसादादीश्वरस्य च ॥ उक्तसंख्यागमानां च प्रमाण्याद्युज्यते खिलं ॥ ३९ ॥ दृश्यत्वाद्धिम
तं मिथ्या स्वप्नवच्चेद्दिदं चमा ॥ मिथ्यात्वे तत्साध्यसिद्धिर्न व्यभिचारो न चेद्भवेत् ॥ ४० ॥ साधकत्वमसत्यस्य साध्यं विप्रतिपत्तितः ॥ तस्य
चेत्यनवस्थास्यात्तत्संचास्यानुभूतितः ॥ ४१ ॥ अनुभूतिविरोधेन मिथ्यात्वे मनकाचन ॥ अतीतानागतौ कालावपिनः साक्षिगोचरौ
॥ ४२ ॥ तत्संबंधितया सत्वमपि दृष्टस्य साक्षिगं ॥ दृढदृष्टं तु यद्दृष्टं दृष्टाभासस्ततोऽपरं ॥ ४३ ॥ भ्रांतेः संवित्तिसत्यस्याविशेषाव्यभिचा
रत्वात् ॥ तेनाप्यंगीकृतसम्यक्तत्तः सत्यत्वमेव हि ॥ ४४ ॥ वित्तानाद्यभिचारोस्य कदाचित्तस्यादिति भ्रमः ॥ नैव दृष्टा भ्रमासा च न स्वेन स
विरोधतः ॥ ४५ ॥ भेदो विशेष्यधर्म्यादिग्रहणापेक्षया यदि ॥ अन्योन्याश्रयताहेतोर्दुर्ग्राह्य इति यन्मतं ॥ ४६ ॥ स्वरूपं वस्तुनो भेदो य
त्तस्य यद्ग्रहः ॥ अन्यथास्यामुना भेद इति वक्तुं न युज्यते ॥ ४७ ॥ अगृहीतो यदा भेदस्तदा स्वस्मादिति ग्रहः ॥ स्यात्स्थलीति विरोधा
त्तन हि कश्चित्तथा वदेत् ॥ ४८ ॥ धर्मित्वप्रतियोगित्व तद्वद्युगपद्यदि ॥ विशेषणं विशेष्यं च तद्भावश्चैव गृह्यते ॥ ४९ ॥ को विरो
धः स्वरूपेण गृहीतो भेद एव तु ॥ अस्यामुष्मादिति पुनर्विशेषेणैव गृह्यते ॥ ५० ॥ किंच भेदः कथं ग्राह्य इति यः परिपृच्छति ॥ ध
र्म्यादिभेदग्रहणात्तेनोक्तोन्योन्यसंश्रयः ॥ ५१ ॥ अन्यत्वाग्रहणे प्रोक्तः कथमन्योन्यसंश्रयः ॥ अन्यत्वं यदि सिद्धं स्यात्कथम
न्योन्यसंश्रयः ॥ ५२ ॥ एतादृशास्य वक्तारासुरात्मजनराकरौ मायी माध्यमिकश्चैव तदुपेक्ष्यो बुधर्षिभिः ॥ यच्चान्यवादिनः
शून्यं तदेव ब्रह्मापिनः ॥ नहि लक्षणभेदोस्ति निर्विशेषत्वरतस्तयोः ॥ ५३ ॥ अन ता दिविरोधि स्वमुभयोश्च स्वलक्षणं ॥

रूपस्पर्शादिहेतुभ्यः परमाणोरनित्यता ॥ अनुमेयश्रुतीनां च विरुद्धत्वान्न तन्मतं ॥ ९१ ॥ उपादेयमतश्चायमविरुद्धं समा
न्वयः ॥ वैभाषिकाश्च सौत्रांतिकाः ॥ स्वरसक्षणिकं जगत् ॥ ९२ ॥ अणूनां समुदायं च कालकर्मनिमित्ततः ॥ उत्पत्तिकाले
मुक्तानामात्मानं च क्षणस्थितं ॥ ९३ ॥ नित्यं संतानमेतेषां पंचस्कंधात्मना स्थितं ॥ संस्काररूपविज्ञानसंज्ञा दुःखात्मना
स्थितिः ॥ ९४ ॥ दुःखभावस्सुखं चाहुर्नरूपज्ञानसंततिं ॥ मोक्षं ससमुदाये हि नैवास्मादेव युज्यते ॥ ९५ ॥ नोभयोश्चोभयत्व
न्न तत्समुदायव्यपेक्षया ॥ अतोन्योन्याश्रयत्वेन समुदायो न युज्यते ॥ ९६ ॥ अन्योन्यापेक्षया पुंसः समुदायत्ववेदनं ॥ स्या
त्तत्सदातनत्वेपि तच्च सामीप्यहेतुकं ॥ ९७ ॥ इति चेत्कार्यसंभूतिमात्रव्यावृत्तिकारणं ॥ न तु कार्यविशेषेषु व्यावर्तं कारणं भवे
त् ॥ ९८ ॥ अतोर्थेंद्रियसंयोगि रूपकारणतात्मनः ॥ संयोगि रूपराहित्ये भेवतद्ज्ञानतापि हि ॥ ९९ ॥ विशेषकार्यजनकं
यदि कारणमिष्यते ॥ कुतः समानरूपत्वं कार्याणामपि सर्वशः ॥ ३०० ॥ अतो नियत्या यत्किंचिद्यस्य कस्यापि कारणं
अदृष्टमपि तस्यैव विशेषापादकं कुतः ॥ ३०१ ॥ यस्य कस्यापि यत्किंचिद्विशेषमुपपादयेत् ॥ कार्यं च कारणं चैव यत्किं
चिद्यस्य कस्यचित् ॥ ३०२ ॥ सर्वत्र नियामकाभावादिदमस्यैव कारणं ॥ इति नित्यविनाशित्वे केन मानेन गम्यते ॥ ३०३ ॥
दृदनजायते तु मुख्यादित्यत्रापि न कारणं ॥ विनाशोत्पत्तयश्चैव नदृश्यन्ते सदातनाः ॥ ४ ॥ दृश्यते प्रत्यभिज्ञातः स्थिरत्वं

दिव्यासंनाशेननोमते ॥ ७० ॥ नैवंलस्यान्यथाभावोयुस्यानित्यत्वमीरितं ॥ रूपादिषुक्रस्यलथा जगन्नाशित्वसिध्यये ॥ ७१ ॥
व्याप्यातयान्यथाभावादात्मनोनित्यताभवेत् ॥ नित्योर्ध्वगतिरप्येषायामुक्तिरितिकथ्यते ॥ ७२ ॥ आलोकाकाशमात्रस्यक
थंनविह्नतिश्चसा ॥ कीदृशश्चान्यथाभावोनाहिशेलुलयोप्यते ॥ ७३ ॥ स रुद्धनायगमश्चेलनहिभूसागरादिषु ॥ य॰ कश्चिदन्य
थाभावोयदिमुक्तिश्चतादृशी ॥ ७४ ॥ देहमानेविकार॰ स्यादितिखारूनमात्मन॰ ॥ आहहरूपादिदेहेषुघ्यपिस्यादन्यथाभव॰ ।
॥ ७५ ॥ अणुदेहस्यजीवस्यगजत्वेविह्नतिर्हिया ॥ देहव्याप्त्यैविशेष॰ केलस्यात्खारतुलनोचनु ॥ ७६ ॥ गीतात्पुष्पफलावाप्ति॰
२९ न स्यरात्कार्यसैह्निति॰ ॥ अपिवृक्षस्यदृश्यतरतिनानात्मताभवेत् ॥ ७७ ॥ एवंचात्मा कस्त्र्यैमितितत्तएवाहवेदवित् ॥ सर्वज्ञ
त्वादिके॰ सर्वैर्गुणैर्युक्तसदाशिवं ॥ ७८ ॥ जगद्विचित्ररचनाकर्तारंदोषवर्जितं ॥ आहु॰ पाशुपतास्तत्र बहुश्रुतिविरोधत॰ ॥
॥ ७९ ॥ नोपादेयंमतंह्यस्यदेवस्यरक्तहिगर्लकं ॥ उषिपेक्षनिरस्तस्यगृणाधिसत्यतिपदं ॥ ८० ॥ यद्विष्णोरूपमंहंतुरुद्रमाकथ्य
तेमया ॥ धनुर्यकामयेतंतमुग्रमाशिश्चदेवता ॥ ८१ ॥ घ्नंचिश्चदेवनेकोसात्वासीन्नारायण॰ पूर॰ ॥ तस्मादुद्र॰ संप्रसाद॰ श्चा
भूतावैष्णवंमरवं ॥ ८२ ॥ यज्ञेनयज्ञमयजंता ॥ बध्नन्तुरुषंपशुं ॥ योभूतानामधीपतीरुद्ररतंलिरेष्य ॥ ८३ ॥ इत्यादिश्रुतिसा न २९
मथ्यीत्पारतंच्यंजनिर्मिति॰ ॥ पराधीनपदप्राप्तिरजलप्रलयेभव॰ ॥ ८४ ॥ प्रतीयंतेसदोषलाभेश॰ पशुपतिस्तत॰ ॥ अशरीरस्य

तस्यसंबंधोजगताक्वचित् ॥ ८५ ॥ कर्तृत्वेननयुज्येतदेहिनोज्ञानदृष्टित ॥ नचदेहादिवद्धिन्नमस्यस्याज्ञोमसंभवात् ॥ ८६ ॥ अ
धिष्ठानेखिल॰ कर्ताकार्यंकुर्वन्प्रतीयते ॥ नोस्याधिष्ठानयोगोस्तिभूतानांप्रलयेतदा ॥ ८७ ॥ अदेहश्चेदसर्वज्ञ॰ शिलाकाष्ठादिवत्स
दा ॥ देहीचेदंतवानेवयद्वदत्तनिदर्शनात् ॥ ८८ ॥ नचैतदखिलंविष्णोश्रुतिप्रामाण्यगौरवात् ॥ मनोबुध्यंगितांविष्णोर्लक्ष्ययामो
यएवस॰ ॥ ८९ ॥ सएवदेह्योविज्ञानमैश्वर्यशक्तिरूर्जित ॥ देहोविष्णोर्नलेविष्णोर्वासुदेवोयतोभवेत् ॥ ९० ॥ एकोनारायणआ
सीन्नब्रह्मानचशंकर॰ ॥ अजस्यनाभावध्येकमर्पितंमात्रयापर॰ ॥ ९१ ॥ सदेह॰ करवग॰ धश्चज्ञानभा॰ सत्यराक्रम॰ ॥ ज्ञानज्ञान॰
करवकरव॰ सविष्णुपरमेश्वर॰ ॥ ९२ ॥ आनंदरावरोको त्यग्र आशीआरायल॰ प्रभु ॥ प्रियंतस्यशिरोमोदप्रमोदोन्वभुजौहरे॰ ॥ ९३ ॥
आनंदोमध्यतोब्रह्मपुछंनान्यदभूत्क्वचित् ॥ मनसोस्यभवोद्दूम्हाललाटादपिशंकर॰ ॥ ९४ ॥ चक्षुयोर्गरुड॰ शेषोमुखादासखस्यैरखतो ॥
सहस्रशीर्षापुरुष॰ सहस्राक्ष॰ सहस्रपात् ॥ ९५ ॥ इत्यादिश्रुतिसंदर्भबलान्नित्यगुणात्मन॰ ॥ विष्णोर्देहाज्जगत्सर्वमाविरासी
दितीयते ॥ ९६ ॥ मानवत्वाद्दिरोध॰ कैनमानंक्वचिदिष्यते ॥ अविरोधोविरोधश्चमानेनेवहिगम्यते ॥ ९७ ॥ अतउक्तंसमस्तंचवासु
देवस्ययुज्यते ॥ शिवादिनामयुक्ताश्चश्रुतयोविष्णुवाचक॰ ॥ ९८ ॥ नामानिसर्वाणियमेकोयाद्वैवनामधा॰ ॥ विष्णुनामानिना
न्यस्यसर्वनामाहरिस्वयं ॥ ९९ ॥ ननारायणनामानितद्येष्वपरेहरो ॥ इत्यादिश्रुतयस्तत्रमानचोक्तंसमन्वय॰ ॥ १०० ॥ पुराण

त्रिपुराणाद्यैर्विरुद्धत्वान्न तत्प्रमा ॥ तद्विरुद्धेषु नो मानं पूर्वापरविरोधतः ॥ १ ॥ समन्वयस्य विरोधाच्च नियमाद्देवीणावेष्यपि ॥ मोहार्थं
मुक्तितश्चैव विष्णुरेके गुणार्णवः ॥ २ ॥ स्कंदस्यैव गणेशादिमतानि न्यायतो मुतः ॥ निरस्तान्यन्यशेषेण सिद्धांतस्या विशेषतः ॥ ३ ॥
निरस्ते विशेषस्य भावाच्छक्तिमतं पृथक् ॥ इष्यते महती देवी ह्रींकारी सर्वकारणं ॥ ४ ॥ त्रिपुराभैरवीत्यादि नामभिः सप्रथी
३० यते ॥ तस्यां सदाशिवाद्याश्च जायंते देवमानुषाः ॥ ५ ॥ स्थूलभौतिकमप्येतदिति तन्नोपपद्यते ॥ दृष्टा सुप्याः सदा सृष्टिः स्त्रीपुंभ्यो
वाविशेषतः ॥ ६ ॥ केवलात्स्योनहि स्त्रीत्वेस्यसतउत्पत्त्यसंभवात् ॥ नापि महामायामतं वा वैरन्यदुर्यदीरिते ॥ ७ ॥ शिवोपसर्जनाशक्तिः -र्यं
क्तिः ससर्जेदं समंततः ॥ इति तच्चोपपन्नं न शिवस्याकरणत्वतः ॥ ८ ॥ अदेहत्वादपि त्यन्ये ब्रुवुः सर्वज्ञमीश्वरं ॥ अणुधामानतघु
क्रमीशवादप्रवेशनात् ॥ ९ ॥ सार्वज्ञादिगुणैर्युक्तगुरुकल्पनयाद्वयं न युज्यते ह्यतस्त्वीश्वर एक एव प्रयोजकः ॥ १० ॥ उक्तदो
षश्च तत्पक्षस्त्विति नैवात्र दूष्यते ॥ श्रुतिस्मृतीतिहासानां सामरस्येन विरोधतः ॥ ११ ॥ सतां जुगुप्सितत्वाच्च नांगीकार्यं हि ३०
तन्मतं ॥ पंचरात्रनिषेधो यैर्थमेतान्याचक्षते यदि ॥ १२ ॥ सूत्राण्यतिविरुद्धं तद्यत आह स भारते ॥ पंचरात्रस्य कृत्स्नस्य वक्ता
नारायणः स्वयं ॥ १३ ॥ ज्ञानेष्वेतेषु राजेंद्र सर्वेष्वेतदिहेष्यते ॥ पंचरात्रविदो ये तु यथाक्रमपरा नृप ॥ १४ ॥ एकांतभावोप
गता वासुदेवं विशंति ते ॥ इति गीतं चतच्छास्त्रसंक्षेपइतिहीरितं ॥ १५ ॥ वेदेन पंचरात्रेण भक्त्या यज्ञेन चैव हि ॥ दृश्योहं

स्ववाक्याभावसंवादान्नह्यस्यं प्रतिवादिनः ॥ तल्लक्षइति वैधर्म्यान्नेस्य प्रादि यदि त्यजः ॥ ५५ ॥ अप्रयत्नाभिराञ्चक्रे चेति
दृष्टिविरुद्धतां ॥ निष्प्रमाणत्वमप्यस्य स्वरूचयामास विश्वहृत् ॥ ५६ ॥ ज्ञानमेवैकमखिलं ज्ञेयाकारं प्रभासते ॥ तत्र संततिभेद
श्च स्वभेदोभेद एव च ॥ ५७ ॥ कल्पितां प्रतिभासं ते नाना संवृतिभूमिषु ॥ इत्येतदपि नैयुक्तं न हि ज्ञानतया जगत् ॥ ५८ ॥ भासते
तुभवस्यैव विरुद्धत्वादयं त्वलं ॥ तन्मते क्षणिकत्वाच्च ज्ञानस्य स्थिररूपतः ॥ ५९ ॥ ज्ञेयस्योक्तप्रकारेण सर्वश्रुतिविरोधतः ॥
अनुभूतिविरुद्धत्वादपि पक्षाइमेशिवाः ॥ ६० ॥ अहक्षपणको विश्वं सदसद्द्वयमद्वयं ॥ द्वयाद्वयमतत्सर्वं सप्तभंगिसदा तनं ॥ ६१ ॥
नैतत्सदार्थ एकस्मिन् युक्तं दृष्टिविरोधतः ॥ भावाभावतया विश्वं येन रूपेण मीयते ॥ ६२ ॥ तद्रूपमेव तद्दिति नियमः केन वार्यते ॥ त
त्तदोषनिवृत्त्यर्थं त्वीहैतात्तदात्मना ॥ ६३ ॥ यदि तैरखिलैर्दोषैर्लिप्यते चलदर्शिनः ॥ अति हायप्रमाणात्स नियमं सदसत्तया ॥ ६४
अशेषमाविरुद्धं च निर्मानं व्याहतं स्वदं ॥ सर्वप्रकारं वदतो दुष्टहा निरमयहः ॥ ६५ ॥ स्वव्याहतत्वमित्याद्या दोषाः सर्वे भवंति हि
वक्तिस्वप्रभमात्मानं देहमानं तदप्यतः ॥ ६६ ॥ दुष्टनानाशरीरेषु प्रवेशादन्यथाश्च वत् ॥ अन्यथाभाविपक्षस्तु तदनित्यमिति स्थिति ॥ ६७
तन्मते तदनित्यत्वं पुद्गलस्यानिवारितं ॥ नानित्यतास्मत्पक्षेषु तु चेतन्यादेर्विशेषितं ॥ ६८ ॥ लक्षणस्य निवृत्तो तु स्यान्न तच्चे
तनेयाच्चित् ॥ ॐ तभौतात्म कृतं तु पदे देहगासंस्थिति ॥ ६९ ॥ इत्यादिलक्षणस्यैव निवृत्तौ स्यादनित्यता ॥ भौतिकं हे बरूप

॥श्रीगुरुभ्यो नमः॥ ॥अथाशेषसमाम्नायविरोधाशङ्किनः प्रभुः॥ करिष्यन्नाधिदैवाधिभूतजीवपरात्मनां ॥२९॥
स्वरूपनिर्णयायैव वचनानां परस्परं ॥ पादेनानेन विरोधं दर्शयत्यमलश्रुतिः ॥३०॥ अनुभूतियुक्तिबहुवाग्विलोम्यं
च ततोऽधिकं ॥ एतत्सर्वं ततः साम्यद्वारैवैयर्थ्यमेव च ॥३१॥ दृष्टस्य त्वनुसारित्वमुक्तान्यार्थविरोधतः ॥ प्रसिद्धेन
मुख्यीकारे बहुवाक्यानुवर्तिना ॥३२॥ लोकदृष्ट्यनुसारित्वं जीवसाम्यमनादिता ॥ तत्र तत्र परिज्ञानं गुणसाम्यं श्रुतीरितं तथा ॥
॥३३॥ उत्पत्तिमत्त्वं स्वगुणाननुभूत्यल्पकल्पने ॥ नानाश्रुतिश्च वैचित्र्यं युक्तयः प्रतिपक्षगाः ॥३४॥ व्यवस्थानुपपत्ति
३१ श्च स्वातन्त्र्यमनुसारिता ॥ मुख्यताशक्तिमत्त्वं च वैरूप्यं सर्वसंग्रहः ॥३५॥ गत्यादिरीशशक्तिश्च सर्वमानविरोधिता ॥
अभीष्टासिद्धिः सुव्यक्तिः शास्त्रासिद्धिविपर्ययौ ॥३६॥ विशेषकारणं चेति सिद्धान्तस्यैव साधकाः ॥ प्रकृतिः पुरुषः कालो वेदा
स्तदभिमानिनः ॥३७॥ महदाद्याश्च जायन्ते पराधीनविशेषतः ॥ इदं सर्वमसृजतेति जनिमत्त्वमिहोदितं ॥३८॥ अव ३१
ना काशमात्रमाकाशः कथमुत्पद्यतेऽन्यथा ॥ यद्यमौ काशता पूर्वं किं मूलेनि बिडं जगत् ॥३९॥ मूर्तसंपूरणान्नैव यद्य
नाकाशता भवेत् ॥ मूर्तद्रव्याणि चाकाशेऽच्छिन्नान्येव हि सर्वदा ॥४०॥ अतश्चाकाशशब्दोक्तः स्वादृष्टो वि दे
नायकः ॥ होदेव्ये सत्या समुत्पन्न इति श्रुत्याभिधीयते ॥४१॥ भूतमप्यासीत् दिव्यदृष्टिगोचरमेव तु ॥ उत्पद्यते त्व

द्भुतं हि गगनं साक्षिगोचरं ॥४२॥ प्रदेशा इति विज्ञेयं नित्यं नोत्पद्यते हि तत् ॥ तथापि मूर्तसंबंधं परतन्त्रविशेषयुक् ॥४३॥
स्वमेवोत्पत्तिमन्नाम श्रुतिशब्दविवक्षितं ॥ प्रकृतिः पुरुषः कालश्च त्येते च समस्तशः ॥४४॥ ईशाधीनविशेषेण जन्या
इत्येव कीर्तिताः ॥ कालप्रवाह एवैको नित्यो न तु विशेषवान् ॥४५॥ पुरुषाव्यक्तकालानां रमैवैकाभिमानिनी ॥ सिसृक्ष
या विशेषस्तस्यास्तु भगवदिच्छया ॥४६॥ आसीदेव सृष्टेः स्फुटिता प्रधानं विकृतेरपि ॥ सुभासो देहसंबंधात् सृष्टिमत्तु हीरिता ॥४७॥
एवं प्रलयकालेपि प्रतिभाता परावरैः ॥ मुख्यवायुर्नित्यसमः शरीरोत्पत्तिकारणात् ॥४८॥ पराधीनविशेषेण जनिमान
व शब्दितः ॥ नैव किंचित्ततो जन्म वर्जितं परमात्मनः ॥४९॥ पराधीनविशेषत्वे जन्मनः स्थूलता भवः ॥ पूर्वशब्दाविलोप
श्चयादिजन्मेति कीर्त्यते ॥५०॥ रमायानेव जन्मास्ति चैतन्यस्यापि केवलं ॥ प्रधानस्य च वेदस्य वेदस्यापीश्वरेच्छया ॥५१॥
व्यक्तिर्नाभिविशेषोक्तिस्तस्मान्नैव शतेव हि ॥ उत्पत्तिरत्र कथिता स्वतन्त्रत्वात्परमात्मनः ॥५२॥ नैवोत्पत्तिः कथमपि न स्वतं
त्रं ततः परं ॥ अच्छेद्यस्यापि जीवस्य विभागं बहुधा हरिः ॥५३॥ कृत्वा प्रेम्णा प्रदायैव ऐक्यमापादयेत्पुनः ॥ अतश्चावशं सर्वं
चेतनाचेतनं जगत् ॥५४॥ अविभागविभागाय यदा न यति केशवः ॥ किमशक्यं परेशस्य तदेति ह्यभिधीयते ॥५५॥ एवं स्थि
तेपि जीवस्य केचिदाहुः परमात्मना ॥ द्योहमितिपूर्वोभिः श्रुतिभिश्चानुमावलात् ॥५६॥ न तद्युक्तं यतो विष्णुः पृथगेवाभिधीयते
त

प्रज्ञानेत्रोऽलोक इति मुक्तो भेदोऽभिधीयते ॥५७॥ आनंदमित्यन्यापरमं साम्यमित्यपि ॥ इदं ज्ञानमुपाश्रित्य मम साध
त र्म्यमागताः ॥५८॥ सर्गेऽपि नोपजायंते प्रलये न व्यथंति च ॥ उपसंपद्यते ज्योतिः स्वरूपेणाभिपद्यते ॥ तत्र पर्येति जक्षत्
क्रीडन्नपि सदा सुखी ॥ आचक्ष्व मे परं मोक्षं धीरा यं प्रवदंति तं ॥६०॥ इत्युक्त आह वाग्देवी परमोक्षं प्रजापते ॥ आखवा ह्याखवो
महानघः संयांति यतिनस्तत्र ॥६१॥ धाना पूपा मांसकामाः सदापायसकर्दमाः ॥ यस्मिन्नग्निमुखा देवाः सेंद्राः सह मरुद्गणाः
॥६२॥ ईजिरे क्रतुभिः श्रेष्ठैस्तदक्षरमुपासते ॥ प्रविशंति परं देवं मुक्तास्तत्र वशेगिनः ॥६३॥ निर्गच्छंति यथाकामं परेशेनैव
३२ चोदिताः ॥ भेदद्रष्ट्याभिमानेन निःसंगेनापि कर्मणा ॥६४॥ कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभ ॥ ससंगत्य पुनः काले
कालेनेश्वरमूर्तिना ॥६५॥ जाते गुणव्यतिकरे यथापूर्वं प्रजायते ॥ स्वांत्वः पोषमात्रेच परेण प्रेरिता सदा ॥६६॥ यत्रा
स्त मं स्रजत्यर्थं चात्मनात्तत्स्रजत्यपि ॥ सहैव ब्रह्मणा कामानू भुंक्ते निर्लीनलिंगतः ॥६७॥ दुःखादीनपरित्यज्य जग ३२
द्व्यापारवर्जिताः ॥ भुंक्ते भोगान्स देवोऽत्रं नित्याद्यागममानतः ॥६८॥ मुक्तस्य स्वेदो व गतेः कथमेवत्वभिन्नता ॥ जीवेशा
योर्नानुमात्रं तद्भेदं प्रमापयेत् ॥६९॥ मिथ्येव भेदो विमतो भेदत्वाच्चंद्रभेदवत् ॥ इति चेत्साध्यधर्मीयं स न संख्यानवाक्षयं ॥
॥७०॥ यदि सन्नपसिद्धांतः ससत्त्वा सन्निलीयते ॥ नोभयं चेन्न सिद्धं तद्दित्यमानस्य दूषणं ॥७१॥ नच मानांतरेणैतद्धकं
साधयितुं क्वचित् ॥ अनुमानं चेत्तैव ह्यनवस्था भविष्यति ॥७२॥ नचागमस्तदर्थोऽस्ति नासदासीन्नतद्वदेत् ॥ परिशेष

नान्यथा द्रष्ट्योऽवर्षकोटिशतैरपि ॥१६॥ इति वराहवचनं श्लोकाद् इति च श्रुतेः ॥ वेदेषु पंचरात्रेषु ध्येयो नारायणः
परः ॥१७॥ पंचरात्रं च वेदाश्च विधेयैकेव हि ध्येयते ॥ इत्यादि वेदरत्नेऽपञ्चमं यो द्यते ॥१८॥ कथमेवात्र दोषः क उत्पत्तिर्नेति नात्र
इत्यपि ॥ इतिहेतुः क्व न चाभूतभावरूपात्रापि कथ्यते ॥ अनादिकर्मणा बंधो जीवः संसारमंडले ॥ वासुदेवेच्छया नित्यं प्र
मतीति हि तद्वचः ॥२०॥ नहि संसारसादित्वं पंचरात्रेदितं क्वचित् ॥ जीवाभिमानिशेषस्य नाम्ना संकर्षणस्य हि ॥२१॥
वासुदेवाज्जनिः प्रोक्ता प्रद्युम्नस्य ततस्तथा ॥ मनोऽभिमानिनः कामस्येव साक्षाच्छ्रेयः क्वचित् ॥२२॥ संकर्षणादिनाम्नै
वनित्यात्तित्योरुशक्तितः ॥ व्यूहउक्तोऽन्यथा न्यूनक्यं दुष्टत्वमुच्यते ॥२३॥ सयदि विद्याश्चतुर्वेदानित्वेद्ददप्तस्तं ॥ पंच
रात्रादिति कुतो ह्येषः शांडिल्यवर्तने ॥ अतः परमशास्त्रोरुद्वेषाद्दितमासुरैः ॥ दूषणं पंचरात्रस्य वीक्षायामपि नक्ष
मं ॥२५॥ अतोऽशेषजगत्सातानि दोषोरुगुणार्णवः ॥ नारायणः श्रुतिगणैस्तास यदिवसीयते ॥२६॥ अर्थतमः प्र
विशंतियेत्वविद्यामुपासते ॥ ततो भूय इवत्यांतियेतस्यानेवनिंदकाः ॥२७॥ ततो विद्यामविद्यां च यो जानात्युभयं सह ॥
शेषज्ञानादतीत्यैतां विद्ययामृतमश्नुते ॥२८॥ ॥३३३॥ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीम
द्ब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य द्वितीयपादः ॥ २।२ ॥ छ ॥ ॥ छ ॥ ॥ श्रीगुरुभ्यो नमः ॥ छ ॥ छ ॥

यं भेदरूपेण नावगम्यते ॥ ८७ ॥ सर्वज्ञानुमयैवेशो यद्दृष्टोपेयः कथंचन ॥ सर्वसत्वगुणेनैव तया भेदोऽवगम्यते ॥ ८८ ॥ न दुःखानुभ-
वः क्वापि मिथ्यानुभवतां व्रजेत् ॥ नहि बाधः क्वचिद्दृष्टो दुःखाद्यनुभवस्य तु ॥ ८९ ॥ यदि दुःखानुभूतिश्च भ्रान्तिरित्यवसीयते ॥
त अदुःखिता श्रुतिः केन भ्रान्तिरिति गम्यते ॥ ९० ॥ श्रुतिस्व रूपमर्थश्च मानेनैवावसीयते ॥ तच्चेन्मानगृहीतं तत् किं दुःखानुभवे भ्र-
मः ॥ ९१ ॥ न च बाधविशेषोऽस्ति यद्बाधितमभवत्तु ॥ बाधो यद्यनुभूतेऽर्थे कथं निर्णय ईयते ॥ ९२ ॥ कोऽपि ह्यर्थो न निश्चेतुं शक्य-
३३ ते भ्रमवादिना ॥ भ्रमत्वमभ्रमत्वं च यदेवानुभवोपगं ॥ ९३ ॥ एकस्य भ्रमता तत्र परस्याभ्रमता कुतः ॥ भ्रमत्वमभ्रमत्वं च सर्ववे-
द्यं हि साक्षिणा ॥ ९४ ॥ सचेत्साक्षी क्वचिद्दुष्टः कथं निर्णय ईयते ॥ विशेषाः सर्व एवैते साक्षिप्रत्यक्षगोचराः ॥ ९५ ॥ तुरीहत्यं च
तान्सर्वान्व्यवहारः प्रवर्तते ॥ साक्षिणोऽव्यवसायी तु व्यवहारोऽभिधीयते ॥ ९६ ॥ तस्मात्सर्वप्रसिद्धस्य व्यवहारस्य सिद्धये ॥
साक्षी निर्दोष एवैकः सदा ग्राह्यः एव नः ॥ ९७ ॥ शुद्धः साक्षी यदा सिद्धो दुःखित्वं वार्यते कथं ॥ उपजीव्यप्रमाणं तद्द्रष्ट्र- ३३
हकमेव हि ॥ ९८ ॥ अतो जीवेशयोर्भेदः श्रुतिसामर्थ्यसुस्थिरः ॥ तथापि तु चिदानंदपूर्वा स्वेच्छातः स्वगुणाः ॥ ९९ ॥ सारः
स्वरूपमस्यापि मुक्तावप्यवसीयते ॥ अतो भेदश्च वेदेषु श्रुतयः प्रवदंति हि ॥ १०० ॥ पौराणानि च वाक्यानि सुदृढस्याभेदसंश्रयात्
॥ सादृश्याच्च प्रथा नत्वा स्वातंत्र्यादपि चाभिधा ॥ १ ॥ आहुरीशेन जीवस्य न स्वरूपभिदा क्वचित् ॥ स्वानैक्यमेकमत्यं च मुक्तस

तु विशिष्यते ॥ २ ॥ सादृश्यं च विशेषेतु जडजानां द्वयमेव तु ॥ भवेत्सादृश्यमत्यल्पं तृतीयं परमात्मना ॥ ३ ॥ ईशारूपक्रियाणां च गुण-
नामपि सर्वशः ॥ तथैवाव्ययुवानां न त्स्वरूपे चं यत्तु मुख्यतः ॥ ४ ॥ यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ॥ एवं धर्मान्पृथक्पश्यंस्तानेवा-
क्श नुविधावति ॥ ५ ॥ इति श्रुतेर्न भेदं च भेदभेदाख्यमिष्यते ॥ एकमेवाद्वितीयं नेह नानास्ति किंचन ॥ ६ ॥ मृत्योः स मृत्युमाप्नोति य इह नाना न
नेव पश्यति ॥ इति श्रुता विवेत्यस्माद्भेदाभेदनिराकृतिः ॥ ७ ॥ एवोऽस्येयेच सादृश्ये तु निर्वा[illegible]द्धनिर्णये ॥ भेदस्य मुख्यो वचनादपि त-
त्पक्षनिग्रहः ॥ ८ ॥ चेतनत्वादि सादृश्यं यद्यभेदस्तीष्यते ॥ अंगी हस्तं तदस्माभिर्न स्वरूपैकता क्वचित् ॥ ९ ॥ नकेनचिदभेदोऽस्ति भे-
दाभेदोऽपि वा क्वचित् ॥ समुदायमतेविष्णोः स्वगुणादीन्विनापि वा ॥ १० ॥ इति श्रुतेर्न तस्यास्ति भेदाभेदोऽपि केनचित् ॥ अभेदश्रु-
तयोंऽशात्सादृश्यं चांशात्स्यात्तु ॥ ११ ॥ अंशास्तु द्विविधो ज्ञेयः स्वरूपांशोऽन्य एव तु ॥ विभिन्नांशोऽल्पशक्तिः स्यात्किंचित्सादृश्य-
मात्रयुक् ॥ १२ ॥ अंशिनोऽयत्तु सामर्थ्यं यत्स्वरूपं यथास्थितिः ॥ स एव च स्वरूपांशः प्रादुर्भावा हरेर्यथा ॥ १३ ॥ सूर्यमंडलमान्येकः त-
स्य काशाभिमानवान् ॥ सूर्यस्य सप्तमा ब्धेश्च बाह्यो दस्येवार्यः ॥ १४ ॥ कठिनत्वेनमेवेदिः पृथिव्या अश्वदेवता ॥ धरादेव एवमेवेको भगवांश्चिस्फु-
रत्ययः ॥ १५ ॥ नानावत्तास्वरूपेण स्थितः पूर्णगुणः सदा ॥ चिन्मूत्राख्य[illegible]तिमा निन्यायथापद्मश्च देवताः ॥ १६ ॥ सूर्यादिस्यः स्तथैवायं से द
सा नीपरमा पृथक् ॥ देहदोषैश्च दुःखाद्यपेत्रशरस्य देवता ॥ १७ ॥ अन्यास्सूर्यादि देवेभ्यो ह्यनुग्राह्याश्च ते सदा ॥ एवमेव प्र[illegible]
पृस्या पृथक्संसारिणो मताः ॥ १८ ॥ [illegible] ॥ अनुग्राह्याश्च ते नैव तत्स्वसादात्मा क्षिणिः ॥ न तु मत्स्यादि रूपाणामनुसखबि पा
गो

र न
ख्याते ॥ १९ ॥ गुणैरशेषैः पूर्णत्वान्मुख्याभेदोपरैर्नच ॥ अंशाभासाश्च सर्वेपि परस्यांशा मुख्यतः ॥ २० ॥ यथैवापुरुषे छायायाएत
स्मिन्नेतदाततं ॥ नतु पुंपादवत्पादाः जीवास्ते परमात्मनः ॥ २१ ॥ पूर्णानन्दस्य गुणा एवात्र दर्शितयाः स्थिताः ॥ एवं जगाद्धपर
माश्रुति नारायणं परं ॥ २२ ॥ अक्षयो भगवान्विष्णुर्लक्ष्म्यावासो लये स्थितः ॥ मुक्तैः सदा चिंत्यमानो ब्रह्माद्यैरुत्तरोत्तरैः ॥
॥ २३ ॥ प्रकृतिः पुरुषः कालो वेदाश्चेति चतुष्टयं ॥ नित्यं स्वरूपतो विष्णोर्विशेषावाभिमात्रतः ॥ २४ ॥ उत्पत्तिमदिति प्रोक्तं ल
३४ त क्ष्मीस्तदभिमानिनी ॥ जातो जातः पुमान्नोब्रह्मा स्यां वासुदेवतः ॥ २५ ॥ सूत्रात्मा प्राणनामा च देव्यो प्रकृतिमानिनी ततो रूप मा
महन्नाम ब्रह्मणोहं कृतिः शिवः ॥ २६ ॥ ब्रह्मणो बुद्धिनाम्नी मातत इंद्रो मनोभिधः ॥ स्कंदश्च ततएवान्ये सर्वे देवाः प्रजज्ञिरे ॥ २७
नश्रे तत्र पूर्वतया न्युणाः सर्वे समस्तशः ॥ तेभ्यश्च भगवान्विष्णुस्तदधीना इमे सदा ॥ २८ ॥ जन्मस्थितिलया ज्ञाननियतिज्ञानसं
स्रतिः ॥ मोक्षश्च तदधीनत्वमेतेषां नैवहीयते ॥ २९ ॥ मुक्तावपि सदैवैकः स्वतंत्रः पूर्णसद्गुणः ॥ इति श्रुत्युपपत्तिभ्यां पादेस्मिन्
प्रभुणोदितं ॥ ५३० ॥ ॥ १०० ॥ इति श्रीमदानंदतीर्थभगवत्पादविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्याने द्वितीयाध्यायस्य तृतीयः
पादः ॥ २।३ ॥ श्रुत्यर्थः श्रुतियुक्तिभ्यां विरुद्धइवदृश्यते ॥ यत्र तन्निर्णयं देवः सुविशिष्टोपपत्तिभिः ॥ ३१ ॥ करोत्यनेन पाद ३४
न तत्र स्पष्टार्थवच्छ्रुतिः ॥ विशेषश्रुतिवैरूप्यमहात्म्यव्यक्तसद्गुणः ॥ ३२ ॥ दृष्टयुक्तिः समानत्वं कर्तृशक्तिर्विमिश्रता ॥ प
रूप्य पूर्वपक्षेषु सु निर्णीतास्तु तादृशाः ॥ ३३ ॥ युक्तयो निर्णयस्यैव स्वयं भगवतोदिताः ॥ ४ ॥ इति श्रीम॰ दृ॰ दे॰ ह ब्रसू॰ द्वि॰ त॰ ॥ २।४ ॥

दनिर्वाच्यं यदि सिध्येत्परमात्मनः ॥ ७३ ॥ अनिर्वाच्यत्वमेवस्यात्स्वविशिष्टोत्यसौतदा ॥ नचान्य आगमः सूत्रं सदसत्त्वेतियोगि
नि ॥ ७४ ॥ नचप्रत्यक्षमत्रास्ति नचार्थापत्तिरिष्यते ॥ बाधायोगात्सतइति बाधत्वावत एव हि ॥ ७५ ॥ दृष्टापत्तिर्नहिश्लोकावपि बाधो
वगम्यते ॥ विषयस्य कुतो बाधो विद्यमानं हि बाध्यते ॥ ७६ ॥ नहि वंध्यासुतो वध्यो यज्ञदत्तो हि वध्यते ॥ बाधायोगात्सत इति व्या
द्वि रेखा कृदृश्यते ॥ ७७ ॥ कश्चायं बाधबुद्धिर्हि न हि नाशोस्तु लोके वेत् ॥ निवृत्तिश्चाप्रवृत्तस्य कथमेवोपपद्यते ॥ ७८ ॥ नासीदत्रिभ
विष्यंच्च लदिति ज्ञानमेयतः ॥ यदि सौध स्तदासत्त्वे तेनैवांगीकृतं पुनः ॥ ७९ ॥ प्रतीतेर्न सदिति वदन्नांगीकरोति तत् ॥ निषेधो
त्वप्रतीतस्य कथंचिन्नोपपद्यते ॥ नचोपमासवेद्यत्र प्रत्यक्षात्सत्त्वमेवच ॥ शास्त्रगम्यपरेणात्र नभिदः स्वात्मनः इयते ॥ ८० ॥ अनु तृ
भूतिविरोधेन कथमेकत्वमुच्यते ॥ किंचित्कर्ता च दुःखीति सर्वैरेवानुभूयते ॥ ८१ ॥ सर्वज्ञो भगवान्विष्णुः सर्वशक्तिरि
ति श्रुतः ॥ अनुभूतास्विभेदेन श्रुतिरेषा वदत्यमुं ॥ ८२ ॥ उपजीव्यविरुद्धं तु कथमेवं श्रुतिर्वदेत् ॥ अप्रामाण्यं यदा भेदवा
चकस्य भविष्यति ॥ ८३ ॥ स एव धर्मिणो ग्राही तद्भेदः कथं भवेत् ॥ यत्स्वरूपग्रहे मानं धर्मेन कथं भवेत् ॥ ८४ ॥ एकवि
ज्ञानविज्ञत्स्याद्व्ययमानं भविष्यति ॥ नचेदेकं प्रमाणं तद्व्ययमप्यत्र नो भवेत् ॥ ८५ ॥ धर्मिग्राहि विरोधस्तु तस्मान्मानस्य दू
षणं ॥ नोपजीव्योह्यभेदोत्र कश्चिद्भेदश्रुतेर्बलात् ॥ ८६ ॥ नचमानं तरोपेयं ब्रह्मतद्भवति क्वचित् ॥ येन मानेन चोप

अनुव्या॰ दृष्टं समाधिकरणं दृश्यते त्रत्र सभ्रमः॥ ॥१५॥ वासनामात्रमूलत्वा ज्ञाप्यत्वात्स्पष्टता नच भेदाभेदो थवा द्वैतमिति प्रश्नो नयुज्यते
॥१६॥ दृष्टुः स्वप्नस्य दृष्टत्वाद्विदस्ये वाखिले जने॥ प्रश्नदोषा हि चत्वारः स्वरः व्याहतिरसंगतिः॥ ॥१७॥ सिद्धसाध्य विवेकत्वं न ता
तेस्या तत्त्व निर्णयः॥ तत्त्वनिर्णयवेलो म्यस्या ह्यादेपि हि नियहः॥ ॥१८॥ उद्भावनीयमेवस्यन्न कथावसितिर्भवेत्॥ विजिगीषुक
थायां तु कथावसितिकारणं ॥१९॥ परिहारेपि सिद्धत्वं दूषणं प्रतिवादिनः॥ प्रतिज्ञायां तदन्यस्य सिद्धेर्वहि साधिका ॥२०
आश्रयव्याश्रयासिद्धी साध्यासिद्धिश्च दूषणं॥ केषांचिन्न च ते दोषाः व्याप्तेरत्वां कथंचन॥ ॥२१॥ दोषा व्याहतिरेवास्ति न श्रृंगा
३५ सित्व साधने॥ यत्र व्याहतता नास्ति कोपि संगोस्य साधने॥ ॥२२॥ प्रत्यक्षागममूलास्तु न्यायाः सर्वे भवंति हि॥ न्यायाभासास्त्र
मूलास्तु न्यायस्यान्यस्य तो पुनः॥ ॥२३॥ अदृष्टे व्यभिचारे तु साधकं तदिति स्फुटं॥ ज्ञायते साक्षिणैवाथ्या मान बाधेन तद्भवेत्॥ ॥२४
मा यत्सा क्षिणैव मानत्वं मानानामवसीयते॥ अमानस्य तु मानत्वं न सत्वाच्चं तं भवेत्॥ ॥२५॥ उत्सर्गतोपि यत्साम्य अपवादविवर्जि
तं॥ व्यभिचार्यपवादेन मानमेव भविष्यति॥ ॥२६॥ अतो हि भोजनादीनामिष्टसाधनतानुमा॥ मान व्यवहृता नित्यव्यभिचारो हि तत्र
च॥ ॥२७॥ व्याप्तत्वे व्याश्रयत्वं तु कथमेव हि दूषणं॥ रोहिण्युदयआसन्नः कृत्तिकाभ्युदितायतः॥ ॥२८॥ इत्यत्र कैसा धनं नो किं ३५
नयात्रेवात्र साधिका॥ अन्यत्सदसतो विश्वमिति त्विव्याहतेरमा॥ ॥२९॥ असिद्धसाधनदोषः को व्याप्तिर्योदि विद्यते॥ व्याप्ति
श्च व्यतिरेकेण तत्रतेश्चावगम्यते॥ ॥३०॥ अप्रसिद्धस्य साध्यस्य साधकत्वं यदेष्यते॥ लिंगस्योक्तविरोधोयं केन मानेन गम्यते ॥३१॥॰

साधनं परमाणवादेर्यदासिद्धस्य चेष्यते॥ यथानुभवमेवैतन्नांगिकार्यं कुतस्तदा॥ ॥३२॥ यत्र नातिप्रसंगोस्ति मानं न च विपर्यये॥
क्लिष्टकल्पनयैवात्र साध्यमित्यादि दुर्वचः॥ ॥३३॥ परिशेषो मिथः सिद्धिश्चक्रकत्वाश्रयादयः॥ असिद्धसाधकत्वेन पत्नावयवि
तां विना॥ ॥३४॥ अंगी कार्या समस्तैरेतन्नियमः किंनिबंधनः॥ सिद्धसाधनतायां तु न कथावसितिर्भवेत्॥ ॥३५॥ व्यभिचारो हेतु
सिद्धिरेकपक्षेपि दूषणं॥ साध्यसाधनवैकल्यं दृष्टांतस्य विशेषणे॥ ॥३६॥ वैयर्थ्यमेकासिद्धो च विशिष्टासिद्धिरेव हि॥ अप्र
योजनता तत्र प्रथमं प्रश्नदूषणं॥ ॥३७॥ सिद्धप्रश्नादिकं यत्तदाधिक्यं तर्गतं भवेत्॥ अर्थापत्त्युपमा भावा अनुमांतर्गतां कचित
॥३८॥ प्रत्यक्षांतर्गतो भावः स्मरवादे नियमेन च॥ अन्यत्रज्ञ इति प्रोक्तः प्राग्भूयः श्रसुत्ययः॥ ॥३९॥ आगमार्थावसित्यर्थं नियत
व्याप्तयोरिव हाः॥ वाक्यं प्रकरणं स्थानं समाख्या च तथाविधाः॥ ॥४०॥ कुरुपांडववत्तेषामुपपत्त्या पृथक्कृतः॥ स्वन्याये सा
धनं कार्यं परन्याये च दूषणं॥ ॥४१॥ स्वन्याये दूषणं च स्यात्साधिते प्रतिवादिनः॥ प्रसंगार्थतया प्रोक्तान्सिद्धांतस्य दूषका॥
॥४२॥ छलं जातिरिति द्वेधा व्याहत्यंतरमिष्यते॥ जातिश्च व्याहतिर्ज्ञेया छलमर्थांतरोत्तरं॥ ॥४३॥ एवं संशोधितन्यायसदा
गमविरोधतः॥ नैनिर्वाच्यमिह प्रोक्तं मायामात्रपदेन हि॥ ॥४४॥ विलक्षणं सदसतोरिति हि व्याहतं स्वतः॥ प्रतियोगित्वम ॥४६॥
प्यस्य ब्रह्मणोंगीकृतं भवेत्॥ ॥४५॥ मिथ्या चेत्प्रतियोगित्वे वेलक्षण्यं ततो न हि॥ अविलक्षणतां सत्यं स्यान्मिथ्यात्वं ब्रह्मणः स्ततः॥

अनिर्वाच्यस्य सत्वं वा यदि धर्मानिकेचनं ब्रह्मणो नैव जिज्ञास्यं जिज्ञासा धर्मनिर्णयः ॥ ४७ ॥ इदमित्थमिति ज्ञानं जिज्ञासायां प्रयो
जनं ॥ इत्थं भावो हि धर्मोस्य न वै अप्रतियोगिता ॥ ४८ ॥ इत्थंभावात्मकं धर्मं [illegible] नाहुश्च श्रुतयोखिलाः ॥ अद्व
यत्वाद् बोध्यस्य गुणत्वहि प्रभुसोदिता ॥ ४९ ॥ यदि स्युस्तादृशा धर्माः सिवसत्वादयो न किं ॥ अन्यापेक्षा यदि स्युस्ते सत्वे वेदं दृशा कु
लगा ॥ ५० ॥ देशकालानपेक्षा हि न सत्वाद्यपि दृश्यते ॥ सर्वधर्मोज्झितस्यास्य किं शास्त्रेणावगम्यते ॥ ५१ ॥ मिथ्याधर्म वि
धातुश्च वेदस्यैव प्रमाणता ॥ अप्रामाण्यभ्रांतिमापाद्य किं वेदो मानतां व्रजेत् ॥ ५२ ॥ नहि वेदं विना ब्रह्म वेद्यं धर्माश्च तद्गताः ॥
३६ वेदवचस्यामिथ्यात्वं यदि नैवास्य तत्कथं ॥ ५३ ॥ धर्मारोपो हि सामान्य धर्मादीनां हि दर्शने ॥ इदं तदादि धर्मत्वे धर्मोन्यः क
ल्पते त्र हि ॥ ५४ ॥ सर्वधर्मविहीनस्य धर्मारोपः क दृश्यते ॥ तदर्थं यदि धर्माणामारोपः सा न वाञ्छितिः ॥ ५५ ॥ ईशात दृग्न वेदा
ध्यज्ञानुमा मात्रपूर्विणा ॥ भ्रांतिर्विश्वस्य येनैव मानात्पासे न कल्प्यते ॥ ५६ ॥ तन्मात्रस्यान्यथाभावा किं न स्याद्धि विश्वस्त्यता ॥
२व स्त येनेदं कल्प्यते भ्रांत भ्रांतिस्तस्यैकिं न सत्ता ॥ ५७ ॥ भ्रांतत्वे तस्य विश्वारोपारोपाश्च भ्रांतमेव हि ॥ भवेयुर्भ्रांतियोनूनं नैव शास्त्रे कथं
चन ॥ ५८ ॥ सत्यत्वमक्षजप्रामाण्यं यदि श्रांतमितीष्यते ॥ प्रामाण्यमागमस्यापि प्रत्यक्षादन्यतः कुतः ॥ ५९ ॥ सार्क्षिप्रत्यक्ष ३६
तोध्येवमानानांमानतेयते ॥ साक्षिणः स्वप्रकाशत्वमनवस्थात तो न हि ॥ ६० ॥ तात्कालिकप्रमाणत्वमेक्षजस्य यदा भवे
त् ॥ ऐक्यागमस्य किं न स्यात्तस्याप्येतादृशं यदि ॥ ६१ ॥ एवं प्रमाणमिथ्यात्वे यदा विश्वस्य सत्यता ॥ ऐक्यवाक्यस्य नानात्वं

॥ श्रीगुरुभ्यो नमः ॥ ॥ ॐ ॥ स्वाभाविकान्यथानाम सहभावान्यथोक्तयः ॥ अविशेषविशेषौ च सहभावो हि मिश्रता ॥ १ ॥
विरुद्धोक्तिः सहस्थानं वैयर्थ्यं चान्यथागतिः ॥ युक्तयः पूर्वपक्षस्य गुणाधिक्यार्थतो भवेत् ॥ २ ॥ उपपत्तिर्द्विरूपत्वगाधिक्यम
नुरूपता ॥ योग्यता बलवत्वं च विभागः कारणं भवः ॥ ३ ॥ क्लृप्तिरन्यागतिश्चैव सिद्धांतस्यैव साधकाः ॥ बीजपुरुषयोनी
नां संगातिनियमोस्तिति ॥ ४ ॥ अथ शब्देन भगवानाह कारणतश्च तं ॥ ॥ इति श्रीमदानंदतीर्थभगवत्पादविरचिते श्रीब्रह्म
सूत्रानुव्याख्याने तृतीयाध्यायस्य प्रथमः पादः ॥ ३ ॥ १ ॥ ॥ ॥ श्रीगुरुभ्यो नमः ॥ ॥ पश्चाद्दृष्टिविज्ञानकाल दुःखपृथग्भ
वाः ॥ ५ ॥ स्थानभेदो विरुद्धत्वं न्यायसाम्यं सतो भवः ॥ गुणसाम्यमयोगश्च तर्कबाधो विलोमता ॥ ६ ॥ नानाभावश्च लोभ
श्च युक्तयः पूर्वपक्षगाः ॥ अशक्यकल्पनाशक्तिः स्वतो बोधस्सदेव च ॥ ७ ॥ अमानक्लृप्तिसन्मानव्यवस्थात्यल्पताभवाः
विशेषदृष्टिवाक्यं च पुंशक्तिसुनिदर्शनं ॥ ८ ॥ अलौकिकत्वमाधिक्यं स्वातंत्र्यनिर्णयप्रमाः ॥ वासनाः सर्ववस्तूनां मनाद्यु
मनसि भवगता ॥ संत्ये बोधषजीवानामनादिस्थिता ॥ त्रिगुणात्मकं मनोरूपेवया वन्मुक्ति सदातनं ॥ १० ॥ तत्रैव शेषे संस्काराः
सञ्चीयेते सदैव च ॥ सूक्ष्मत्वेन लयेस्ब प्राप्तेते रूपचीयते ॥ ११ ॥ सृष्टिकाले यदारभकुलः संसारसंस्थिति ॥ संस्कारैश्च भग
गवानेव सृष्टा नानाविधं जगत् ॥ १२ ॥ स्वप्नकाले दर्शयति भ्रांतिर्जायते मेव हि ॥ अदृष्टत्वाश्च ते भावेन भावउपजायते ॥ १३
अदृष्टादश्रुतादृशा वा न भावउपजायते ॥ इति श्रुतिपुराणोक्तिरनादित्वात्तुयुज्यते ॥ कदाचिद्दर्शना योग्यपत्रापि विभागतः ॥

घटापि तत्रैव नो तस्य गोचरं ॥७६॥ कथमेनोत्तरकालस्तद्रमो क्षस्थिगम्यते ॥ आगमोपि हि सामान्ये सिद्धे प्रत्यक्षतः पु-
नः ॥७७॥ विशेषं गमयेदेव कथं शक्तिग्रहोन्यथा ॥ अतीतानागतार्थेषु जातशक्तिग्रहे खिलं ॥७८॥ विशेष-
३८ तापरो ह्यवाक्यं न तद् जालशक्तिके ॥ शक्तिश्चेद् दुर्लभा नित्या अतीतानागतवेदनं ॥७९॥ यदि शक्तिग्रहोन्यत्र कथं तस्य
तदग्रहे ॥ सामान्यदृष्टमेवासावन्यत्र गमयेद्यदि ॥८०॥ सामान्यवर्जितं वस्तु कस्य रूपं क गमयेत्कथं ॥ नस्वरूपत्वसा-
मान्यं केनाप्यंगीकृतं क्वचित् ॥८१॥ स्वरूपं चेदनुगतं व्यावृत्तं तत्र किं भवेत् ॥ सर्वानुगतधर्माणामंते हि स्वत्वमिष्यते ॥८२
किं व्यावृत्तमिति प्रश्ने स्वरूपमिति किं वदेत् ॥ स्यादुत्तरं ततोन्यत्र तदेव स्वयमेव नः ॥८३॥ एवं व्यावृत्तरूपोपि यदा शक्तिग्रहो
भवेत् ॥ तस्य सामान्यतो ज्ञानं विनास च भवेत्कुतः ॥८४॥ अतो विशेषः सामान्यैरूपसर्वमपीष्यते ॥ व्यावृत्तत्वं च सामान्य
तदेव स्याद्विशेषतः ॥८५॥ न चैक धर्मतान्तेन पदार्थानां परस्परं ॥ धर्माणां भेददृष्ट्यैव तत्साहृश्यस्य दर्शनात् ॥८६॥ यतः
सर्वे पदार्थाश्च सामान्यात्साक्षिगोचराः ॥ सर्वमित्येव विज्ञानं सर्वेषां कथमन्यथा ॥८७॥ किंचित्सादृश्यविज्ञानादवि- ३८
लस्यापि वस्तुनः ॥ शब्दशक्तिग्रहस्तस्यात्तत्साहृश्यमानतः ॥८८॥ प्रत्यक्षमानसं चैव यदातीतार्थगोचरं ॥ तदास्मृ-
ति प्रमाणत्वमतीतत्व विशेषितं ॥८९॥ आधिक्यमनुभूतानां यदातीतत्वमिष्यते ॥ मानता च कथं न स्यात्स्मृतेर्बाधश्च नात्र हि ॥९०॥

मानत्वं प्रत्यभिज्ञाया अपि सर्वानुभूतितः ॥ अतीतवर्तमानत्वं धर्मिणोः साच दृश्यते ॥९१॥ न च सा स्मृतिमात्रं स्यात्तदिदं त्वयहे कतः
अतो न वर्तमाने कनियमः स्याद्दहेक्षजे ॥९२॥ न च प्रमाणतोन्यास्या प्रमितिर्नाम कुत्रचित् ॥ मानाभावाद्वोरवाद्यैक लक्षणायाः क्षि-
मेतया ॥९३॥ मयेत्यह्वातमिति तु साक्षिगं ज्ञानगोचरं ॥ ज्ञानमेव ततोन्यान प्रमितिर्नाम दृश्यते ॥९४॥ मानमातृप्रमेयाणां तदुच्छि-
त्तिर्न हि क्वचित् ॥ स्वाप्नानामपि चैतेषां न बाधो दृश्यते क्वचित् ॥ जाग्रत्वमात्रमत्रैकमन्यथा दृश्यते स्फुटं ॥ अतो मिथ्या न च स्वप्ने
जाग्रद्दुर्जायदेव च ॥९६॥ आत्मवत्क चिदात्मा न स्यादेकोत्र मगोचरः ॥ एतावता न मिथ्या सो स्वप्ने जागरिते तथा ॥९७॥ यद्यात्म-
न्यन्यथा दृश्यं भ्रांतमत्रापि तद्भवेत् ॥ अबाधितानुवृत्तेस्तु स्वप्नादिभ्रांतिता कुतः ॥९८॥ न च कांचित्प्रमादिश्च भ्रांतत्वे सर्वमेव
च ॥ अभ्रांतत्वे प्रमाणां तु कथं तद्भ्रांतता भवेत् ॥९९॥ किंच भ्रांतित्ववादी सः भ्रांतत्वेस्व मतस्य च ॥ अंगीकरोति मियतं तत्र संमति
यन्मता ॥१००॥ वादि नोक्तेन सा भ्रांतं विश्वमेव भविष्यति ॥ भ्रांतत्वं भ्रांतिता चेत्स्यात्कथं ना भ्रांतसत्यता ॥१०१॥ अशेषदो-
षदुष्टं तन्मतं हेयं बुभूषुभिः ॥ येन स्वमतहेयत्वं स्वयमंगीकृतं सदा ॥२॥ भ्रांतित्वाद्दुर्घटत्वस्य भूषणत्वाच्च केवलं ॥ उन्मत्तोपि
कथं तस्य मतं स्वीकर्तुमिच्छति ॥३॥ ईशशक्तेरचिंत्यत्वान्महोन्मतेः प्रवर्तितं ॥ अ तः प्रज्ञातमायोक्ता जैः सुसादनमेव सा ॥४॥
निमित्तमैश्वरी मुख्या निर्मितं त्रालमेव च ॥ ताभ्यां सहपृथक्त्वेव मायामात्रमितीर्यते ॥५॥ उक्ताभ्यां मानमैश्वर्यात्रो तसह पृथक्क्तः

प्रज्ञात्मकं मनो येन मनोरूपाश्च वासनाः॥ धीभीरिति मनस्त्वेवेत्याह च श्रुतिरंजसा॥ ६॥ चिदचिन्मिश्रवमेवैतन्मनो यावच्च संसृ
तिः। तेनावरुद्धरूपाः सर्वे जीवाः पश्यन्ति सर्वदा॥ मनोविकारा विषयाः स्वाप्ना यद्वत्तथैव ते॥ ८॥ स्थूलास्तस्वत्यतरूपेषां स्पष्टता
नतथा क्वचित्॥ क्वचित्स्पष्टा अपि स्पष्टं वासनामानसी च सा॥ ९॥ ईशो छायां तदर्थानि व्यज्यरे ते च पुनरूपया॥ स्पष्टैव वासनाभिश्च
त प्रपंचस्याप्यमी ईश्वरः॥ १०॥ वासनामात्रतां तस्य नीत्वायं धीयय त्यजः॥ स्फुरितबोधमोहश्च स्वचशास्त्रदृष्टान्तं सदा॥ ११॥ जीवं नयति
३८ देवेन्द्रो नान्यकर्तास्ति कश्चन॥ नरस्थानभेदतोऽपन्नयभेदः कुश्चिसेरेशिलुः॥ १२॥ सर्वत्राशेषदोषोज्झपूर्णकल्याणचिद्गुणः॥ त
द्विरस्त्वंतु येतत्रमानं नैवास्त्येव क्वचित्॥ १३॥ महातात्पर्यरोधेन कथं तन्मानमस्तु॥ दुःखाप्ययसुखावलिहेतुत्वेनैव वेदवाक्॥ ३८
१४॥ एवं मानं तदीशानात् प्रसंभोदवनान्यथा॥ प्रसंभतागुणोत्कर्षज्ञानादेव हि केवलं॥ १५॥ निर्दोषतापरिज्ञानादपि नान्येन
चित्॥ व्याप्रामदोषदोषोसगुणसर्वस्वचर्यहिते॥ १६॥ ज्ञानात्परेभ प्रसन्नोहं दद्यान्मुक्तिं न चान्यथा॥ योमामशेषाभ्यधिकं विजा
नाति सयत्नमा॥ १७॥ विजानात्यखिलं तस्य दद्यां कामान् परं पदं॥ योमामेवमसंमूढः किंमां निंदति नात्र वः॥ १८॥
इत्यादिवेदस्मृतिगवाक्यैरेवावसीयते॥ लोकतः स्वप्रसादेन मुक्तिः सगुणवेदनात्॥ १९॥ महातात्पर्यमुख्यस्य विरोधाद
तएव हि॥ दोषित्वनिर्गुणत्वात्मसगुणत्वादिकथंचन॥ २०॥ नार्थः श्रुतिपुराणादिस्तद्धिरत्योखिलस्य च॥ अर्थः स्वयंविनिःतों

यद्यबाध्यमितीष्यते॥ ६१॥ अक्षजस्यापि मानत्वं नाबाध्यं किमिष्यते॥ अद्वैतहानिसामान्या अविशेषश्च कश्चन॥ ६२॥ य
दि स्वतस्त्वं प्रामाण्यविश्वसत्ता कथं न ते॥ प्रामाण्यस्य च मर्यादाकालतो व्याहता भवेत्॥ ६३॥ कालांतरेप्यमानं चेदिदा
नीं मानता कुतः॥ मिथ्यात्वमानं मोक्षेपि मानं केनेति भण्यता॥ ६४॥ मानत्वेद्वैतहानिः स्यादमानत्वेप्यमोक्षिता॥ विश्वस्य
पुनरापत्तिर्मिथ्यामानं यदा न मा॥ ६५॥ अस्ति चेन्मुक्तवस्थाद्वैतापत्तिरतोन्यथा॥ अमुक्तत्वं तथा काले कालाधीना हि मु
क्तता॥ ६६॥ कालएवागमोह्याह मुक्तिं कालनिवर्तनं॥ मुक्तेरपि निवृत्तिः स्यात्संसारित्वमतो भवेत्॥ एकं च प्रत्यक्षतः प्राप्तम
नुगमनबाधितुं॥ देहासंत्मत्वंयदि न तत्प्रासं प्रत्यक्षतः क्वचित्॥ ६८॥ ममदेह इतिह्येव न देहोहमिति भ्रमा॥ उपचारश्च हि स्थूणो
त्वमिति कर्दमत्वपने॥ ६९॥ वस्त्रस्य यद्वदेवस्याद्यच्छुपाधिहतं तदा॥ स्वतः शुक्लत्वरक्तत्वं निममेति प्रतीयते॥ ७०॥ कथं च भे
दो देहाद्यात्मनो न प्रतीयते॥ जातमात्रमृगा गावो हस्तिनः पक्षितोऽसुपाः॥ ७१॥ भयाभयसुखभोगादेः कारणानि विजानते॥ अ
स्मृतोऽपूर्वदेहस्य विज्ञानं तत्कथं भवेत्॥ ७२॥ अन्वयव्यतिरेकादेरनुसंधानविस्मृतौ॥ यदा देहांतरज्ञानं देहे व्यावसितिः कु
तः॥ व्याप्तत्वादात्मनो देहेव्यवहारे च पारवात्॥ भेदज्ञानेपि चांगारे वन्हिवत्स्याविविक्तवत्॥ ७४॥ एवं तिव्यवहाराश्च नहि प्रत्य
क्षगानपि॥ अर्थान्यथानुभवतुः प्रतिपादयितुं क्षमाः॥ ७५॥ लोकास्ततो हि प्रत्यक्षसिद्धं नान्येन केनचित्॥ शक्यं वारयितुं

तदधीनत्वं सर्वविरुद्ध वशेषतः॥ जीवस्य सदृशत्वं च चि- मात्रं न चापरं॥ तावन्मात्रेण चाभासो रूपमेवं चिदात्मनः॥ ३७॥ नो
पाध्यधीनता ह्येषा नातिसाम्यं निदर्शने॥ किंचित्सुखादिसादृश्यमपीशेनासुरान्प्रति॥ ३८॥ तत्र आभासता नित्यं तद्वदाभासतापि
च॥ भावाभासत्वमपि चैवासमं तावतस्ततः॥ ३९॥ जीव आभास उद्दिष्टः स देवपरमात्मनः॥ न जलार्यमस्य प्रतिबिंबो
३९ पमत्वतः॥ ४०॥ तदधीनत्वमेवेति किंचित्साद्दृश्यमेव च॥ सप्रकाशयतः सूत्र गता चाखिलमानतः॥ ४१॥ जीवेशभेदद्दष्ट्यै
व समुदायैकताकुतः॥ अशेषदोषराहित्यं सर्वशक्तित्वतो हरेः॥ ४२॥ सर्वोपलोतिकथित मतमैक्यं कदोषितः॥ अशेष
शक्तियुक्तश्चेत्स्यात्तत्त्याद्दोषवान्कथं॥ ४३॥ अनुसंधानरहितमैक्यं चेद्दैकतानतत्॥ चेतनैक्ये त्वनुसंधानं प्रमाणं नैव चापरे॥ ४४॥
सं अनुसंधानरहितं समुदायैक्यमेव चेत्॥ चेतनेषु स्वकृतं भाममात्रमेवयरस्ततः॥ ४५॥ मुक्तौ स्यादनुसंधानमित्यपि स्यात्सुदु ३९
ष्करं॥ सर्वज्ञाएकता नानुसंधत्ते नैव सायतः॥ पश्चात्स्यादनुसंधानं चेन्मिथ्याज्ञानिता भवेत्॥ विद्यमानं त्वनुसंधानं न चेद्ब्रह्मत्व
मापतेत्॥ असदैक्यं स्वैवस्याद्यदि स्यात्ससमोरसः॥ समुदायैक्यमेतस्माद्दूरतोपाकृतसदा॥ ४८॥ अतोऽशेषगुणोद्भ
वं निर्दोषं यावदेवहि॥ तावदेवेश्वरो नाम तत्र भेदोपि न क्वचित्॥ ४९॥ नेहनाना स्तिकिंचमपि हृदयाय मयं हि सः॥ इत्यादिश्रु
तिमानेन जीवांशाः सर्व एव च॥ ५०॥ नियमेनानुसंधानं यतो यद्येकता स्थितः॥ अंशिनोंशोपसंधानमस्त्यल्पस्यापि विद्यते॥ ५१॥

भुविज्ञातेनचांशेनस्वदुःखादितद्दलं॥ अनुभूयते विशेषस्तु कश्चिदीशस्तुतो भवेत्॥ ईशस्याचिंत्यशक्तित्वा
त्तासवैक्यकपि विद्यते॥ सेतामुपपन्नेवयदि जीवैकतस्य हि॥ ५३॥ अनीशस्येशतत्वेषु विरुद्धं सर्वमानतः॥ ईश
त्वेनैव विज्ञातमनीशत्वेन चेद्यति॥ अनीशत्वेन विज्ञातमीशत्वे ना थवादिशेत्॥ ५४॥ उपजीव्याविरोधेन नैव
मानत्वमेष्यति॥ अत एव शतसिद्धेनाकिंचिछक्यमस्य च॥ ५५॥ ईशत्वेनीशभेदेन कृत्वा सम्यक् पृथक्कारिते॥ अयु
क्तमपि त्वान्यत्रयुक्तं भवति तद्बलात्॥ ५६॥ अतोन्यत्रापि यद्दृष्टं परीशेनैव कल्प्यते॥ स्वाभासासमपि न हीशत्वं परि
पंथियत्॥ ५७॥ ईशो नांशोजन्मिथ्या दुःखी सुक्तेभिधानहि॥ इति प्रतिज्ञाव्याघातः सर्वदोषाधिकाधिकः॥ ५८॥ इति
हि ब्रह्मतर्कोक्तिरतिहेयमतोखिलैः॥ बुभुक्षुभिर्मतमिदं जीवेशाभेदवादिनः॥ ५९॥ नायुक्तमीशत्वं किंचिदीशत्व
स्याविरोधियत्॥ यदीशत्वविरोधिस्यात्तदेवायुक्तमंजसा॥ ६०॥ ईशत्वस्याविरोधेन योजयित्वाखिलाः श्रमाः॥
सिद्धेशत्वेन चायुक्तमपि हीशेन योजयेत्॥ ६१॥ मानतः प्राप्तमखिलं नामानं योजयेत्क्वचित्॥ इति हि ब्रह्मतर्कोक्ति
रतोयुक्तमिहोदितं॥ ६२॥ सत्त्वाश्रद्धतरूपत्वद्रूपः स्वगुणात्मकः॥ रूपमस्याशरीरं परिपाणिपादाद्यात्मकमिष्यते॥ ६३॥
॥ अतोनित्यतानैव श्रुतिद्वयविरोधिता॥ यथाहि तेजसस्यैव प्रकाशास्य द्विजत्वचापि॥ ६४॥ आत्मैव ज्योतिरित्याह

जीवस्यैवांश्रुतिरूथा ।। तद्भक्ति तारतम्येन तारतम्यं विमुक्तिगं ब्रह्मादीनांच सर्वेषां आनंदादेर्यथाक्रमं ।। ६५ ।। प्रतिबिंब
वदप्येषामानंदोन्यगुणायथा ।। ६६ ।। नारायणगुणाधीनु श्चात्यल्पस्तदपेक्षया ।। तस्माद्भिन्नं सततमन्यद्वानेपरस्यच ।। ६७ ।।
अन्यद्वानतु जीवानां अन्य आनंदईशातामुख्ये ज्ञातापदेशस्य गौणी जीवस्य सायतः ।। ६८ ।। इति श्रुतेः स्थितिनान्नीतद
नाथी विलीरिते ।। स्वभावत्वाच्छितेनैतदपेक्षेति नयुज्यते ।। ६९ ।। यतः स्वभावोप्यखिलं ईशायत्तरखिलस्यच ।। अव्यक्तो
४० पि स्वशक्त्यैव भक्तानांदृश्यते हरिः ।। ७० ।। तदभिन्नागुणानित्यमपि सर्वे विशेषतः ।। गुणत्वेन गुणत्वेन भोक्तृयोग्यत
याच्छिताः ।। ७१ ।। विशेषात्मतया तेषांनित्यज्ञास्यात्मनातथा ।। नित्यस्थितेनैधर्माणांक्रियादीनामनित्यता ।। ७२ ।। नवि
शेषात्मनान्वेयमनित्याशक्तिरूपता ।। सैवयत्स विशेषास्याद्विशेषोन्योनचाप्ययं ।। ७३ ।। स्वनिर्वाहकताहेतोरूथापि
स्याद्विशेषत ।। विशेषत्वेनविज्ञातः प्रमाणैरखिलैरपि ।। ७४ ।। ससर्जसंजहारेति विशेषोह्यवगम्यते ।। श्रुत्येवसमएवेति ४०
तदभेदश्चगम्यते ।। ७५ ।। भेदोयदि विशेषस्य सभेदो भेदिनाकथं ।। भि न्नश्चेदनवस्थास्यादभिन्नश्चेत्पुरानकिं ।। ७६ ।। वि
शेषोभिन्न एवेतितेननाभ्युपगम्यते ।। अभिन्नोनिर्विशेषश्चेद्भेदस्यादेदलाकुलः ।। ७७ ।। अनेनानेनेनभि न्नयमितियत्स
विशेषतः ।। भेदरावेषबहुधा दृश्यतेतत्किमुत्तरं ।। ७८ ।। अभेदभेदयोरयश्चैव स्वरूपत्वंहिभेदिनः ।। तयोरप्यविशेषत्वेप
र्यायत्वंहि शब्दयोः ।। ७९ ।। अभेदभेदशब्दौचपर्यायाविति कोवदेत् ।। सदेभ न्योन्यमभेदश्चभेदिनान्वेद्विशेषिता ।। ८० ।। अ

वासुदेवेन साहरं ।। इति गुह्यतमंशास्त्रमिदमुक्तंमयानघ ।। एतद्बुध्वाबुधिमान्स्यात्कृतकृत्यश्चभारत ।। इत्यतोरवेलसच्छा
स्त्राविरुद्धत्वेननानुभा ।। वर्ततितत्रतेनेशो निर्णीतोरखिलसद्गुणः ।। २३ ।। नचचित्वादभिन्नत्वंजीवस्येशबद्वाप्यते ।। यतआभा
सतामिषश्रुतिरस्यवदत्यलं ।। २४ ।। यथैषापुरुषे छायाएतस्मिन्नेतदाततं ।। छायायथापुंसदृशीपुनधीनाचदृश्यते ।। २५ ।।
एवमेवात्मकाः सर्वेब्रह्माद्याः परमात्मनः ।। सत्ताप्रतीति कार्येषुपुमधीनायथैयते ।। २६ ।। आभासएवंपुरुषः मुक्ताश्चपरमा
त्मनः ।। छायाविष्णोरमालस्याः छायाधातावि शेषकौ ।। २७ ।। तस्येदंकामोचलयोस्तयोरत्र्यखिलात्अपिहरब्रह्मास्यगी
तस्याविशेषाविंदुएतयोः ।। २८ ।। मारश्चभासकास्सर्वेएतयोस्तदधीनतः ।। सर्वेत्मनात्कयश्चैवपूर्वशक्तिः परोहरिः ।। २९
चतनत्वेपि भिन्नास्तितस्मादेतेनसर्वदा ।। इत्यादिश्रुतिवाक्येभ्यो ज्ञायतेभेद एवहि ।। ३० ।। आभासत्वंहिनिर्णीत जीवस्यप
रमात्मनः ।। तन्मयुक्तयदाभासउपाध्ययत ईयते ।। ३१ ।। उपाध्यापत्तत्ताभावादाभासत्वविरोधतः ।। नचेतनत्वेनचचि
त्वात्समुदायैक्यमापतेत् ।। ३२ ।। अतः पृथक्कमुदितंसमुदायत्रयोभवेत् ।। ईशारख्यासमुदायेस्यादीशरूपोप्यविवोदिता
।। ३३ ।। अतोदेहाद्युपाधिनामपायेसभताभवेत् ।। ईशरूपेरथाभासामुख्यतः सूर्यकादिवत् ।। ३४ ।। यदातदोपाध्यायतस्स
याणांनासितभवेत् ।। इत्याज्ञांकानिचित्यर्थमाहवेदाधियः प्रभुः ।। ३५ ।। अतएवोपमेत्येवचान्याभासविशेषिता ।। यदुक्तं

॥१९७॥

न्यतोज्ञातः पदांतरबलात्सुनः ॥ एवंविशेषतोज्ञातरूपेण स्यादन्वितोखिलः। अर्थ एव विदितो यस्मात्केनचित्तद्विशेषतः॥
अनेनेति ततः शब्दस्यैव ज्ञायतेनुभवेन हि ॥१९८॥ यद्यनन्वितमेवैतत्स्वदेश्यार्थं वदेदिह ॥ तथान्यान्यपि सर्वाणि कः कुर्यादन्वयं बु-
धः ॥१९९॥ व्यापारो महिमा शब्दस्य परः स्वार्थप्रकाशनात् ॥ अन्वयस्य कथं ज्ञानं शब्दार्थत्वं यदास्य न ॥२००॥ पुमानप्येक-
वारतया ह्यलक्ष्यो यदा भवेत् ॥ यदेवानन्वितार्थस्य वचनं ते भवेत् ॥२०१॥ अनन्वितस्याच्छब्दार्थो न तदार्थो हि सोन्वयः॥
॥४१॥ निराकांक्षापदान्येव वाक्यमित्युच्यते बुधैः ॥२॥ तदर्थाभिधानेन स्यान्निराकांक्षता च सा अपूर्तेस्तावदर्थानामा-
कांक्षा पूर्वमिष्यते ॥३॥ कर्मकर्तृक्रियाणां तु पूर्तौ कोन्यो न्वयो भवेत् ॥ अपूर्तिश्चेत्पदैरुक्तैः किं नु संगेन पूर्यते ॥२०४॥
व्यापारश्चेत्पुनस्तेषामनुक्ता वृषि किं न सः ॥ युक्तेर्बुद्धिस्त्वहितो यदि व्यापार इष्यते ॥५॥ बुद्धिस्थित्यायय लं न क-
थं कुर्युः पुरेव च ॥ पुरुषाधीनता तेषां यदि पश्चात्वसा सम ॥६॥ पुमानेवान्वयायेषां पश्चाद्यदि विवक्ष्यते ॥ अनन्वि- ४१
ताभिधानानां स पदार्थेत्तिरोक्षितु ॥७॥ यत्तत्रांशाब्दशक्तिश्च तत्र नेवान्वयं कथं ॥ तत्कल्पनागुरुत्वादिदोषतोभिहितान्व-
यः ॥८॥ अनुभूतिविरुद्धश्च त्याज्य एवमनीषिभिः ॥ कर्तृशब्देष्वभिहिते धर्मसामान्यवेदनात् ॥ विशेषधर्ममात्रेच्छन्न
किमित्येव हि पृच्छति ॥ गुणक्रियादिधर्माणां विशेषे कथिते पुनः ॥१०॥ निराकांक्षो भवेद्यस्माच्छब्द अन्वितवाचकः ॥

अतोनंतगुणात्मैक्ये भगवानेक एव तु ॥११॥ उच्यते सर्ववेदैश्च तयाखिलविलक्षणः ॥ सर्वे सर्वगुणात्मानः सर्वकर्तार
एव तु ॥१२॥ तथापि सविशेषाश्च विद्युद्धक्तसलिलोपि च ॥ तैस्तैः शब्दैश्च भण्यंते युज्यंते चोपदेशतः ॥१३॥ अन्वानंददि
सादृश्यमनुकूल्यादिना परं ॥ पूर्णत्वादिमहत्त्वेषां वैलक्षण्ये श्रुतो कश्चन ॥ पूर्णशेषनियंता च स्वरूपस्वादुलमराकलः
गुणोरुसमुदायोयं वासुदेवः सुनिष्कलः ॥१५॥ वासुदेवः श्रुतिः सैषा गुणान्वक्ति हरेः परान् ॥ स एवाशेषजीवस्य
निः संख्यानादिकालिकान् ॥१६॥ धर्माधर्मान्सदापन्नयन्स्वेच्छया बोधयत्यजः ॥ कांश्चित्तेषां फलं चैव ददाति स्वयमच्यु-
तः ॥१७॥ नैतद्विशेषकमपि प्रेरणादिकमच्युतः ॥ कुर्युः कदाचितेनायं स्वतंत्रोनुपचारतः ॥१८॥ कर्मोचितानि च पृथक्सृ-
ष्टनान्येव सर्वशः ॥ अचेतनशरीराणि स्वकर्मफलभांजि च ॥१९॥ प्रत्येकं तेषु चानंतकर्मोत्येवं विधानि च ॥ तानि चै-
वमिलीनास्यनिः सीमाशक्तिरुत्तमा ॥२०॥ एकैव ब्रह्महत्या हि वराहहरिणादिता ॥ ब्रह्मापराहणेनैव निष्क्रांतरा-
जदेहतः ॥२१॥ स्तोत्रस्य तस्य माहात्म्यादध्यर्थत्वं गमिता पुनः ॥ प्राप्य स्थानं परं चाप तथा चान्वपि सर्वशः ॥२२॥
अनंतान्युदितान्येवं प्रभुणा कपिलेन हि ॥ संसारे यत्र्युप्यमानानि कर्माण्यपि पृथक्पृथक् ॥२३॥ तस्मादनंतमहात्म्य
गुणपूर्गोजनार्दनः ॥ भक्त्या परमयाराध्य इति पादार्थ इष्यते ॥२२४॥ इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रव्याः

ने श्रीमदानंदतीर्थभगवत्प्रसादविरचिते तृतीयाध्यायस्य द्वितीयः पादः ॥ छ ॥ छ ॥ ३१२ ॥ ॥ छ ॥ ॥ छ ॥ छ ॥
श्रीगुरुभ्यो नमः ॥ ॥ वैराग्यतो भक्तिदार्ढ्यं तेनोपासा यदा भवेत् ॥ अपरोक्ष्यं तया विष्णोरिति पादक्रमो भवेत् ॥ २५ ॥
युक्तिवेदातवेदार्थैर्निरस्य समयान्यरान् ॥ परस्परविरोधं च प्राप्नुद्यानोप वाक्यगं ॥ २६ ॥ अध्यात्मप्रवणो हृत्वालस्य
सन्निहितत्वतः ॥ बहुयुक्तिविरोधानां भानात्तत्सहितश्रुतेः ॥ २७ ॥ विरोधं च निराकृत्य श्रुतीनां प्राणतत्त्वगान् ॥ पुरिह
४२ त्यविरोधांश्च तत्प्रसादानुरंजितः ॥ २८ ॥ देहकर्तृत्वमीशस्य ज्ञात्वा तत्पितृतां स्मृतेः ॥ विशेषस्नेहमायाद्य सर्वकर्तृ ४२
त्वतोऽधिकः ॥ २९ ॥ निष्पाद्य बहुमानं च तदन्यत्राति दुःखतः ॥ उत्पाद्याधिकवैराग्यं तद्गुणाधिक्यवेदनात् ॥ ३० ॥ सर्वस्य
तद्वशत्वाच्च दार्ढ्यं भक्तेः स्वाप्यं च ॥ यतेतोपासनायैव विशिष्टाचार्यसंपदा ॥ ३१ ॥ कर्तव्या ब्रह्मजिज्ञासेत्युक्ते किमि
तिसंशये ॥ अतद्धत्कदितव्यस्य विशेषानुक्तितः पुनः ॥ ३२ ॥ सृष्टिबंधनमोक्षादिकर्तृत्वस्य श्रुतत्वतः ॥ यतो मोक्षादि
दातासावतो जिज्ञास्य एव च ॥ इत्याह तत्परब्रह्म व्यासाख्यं ज्ञानरश्मिवत् ॥ ३३ ॥ येनैव बंधमोक्षस्यात्तस्य च जिज्ञा
सयागतः ॥ स प्रसन्नो भवेदीशो जिज्ञासातोऽस्य मुक्तिदा ॥ ३४ ॥ मोक्षादिदत्वमीशस्य कथमेवावगम्यते ॥ इति तेच्छास्त्र
योनित्वाच्छास्त्रगम्यो हि मोक्षदः ॥ ३५ ॥ प्रत्यक्षावसितेभ्यः स्याद्यदि मोक्षः कथंचन ॥ किमित्यनादिसंस्कारा मन्नाः

विशेषक कथं भेदाभेदिरनेकस्तथाविधिः ॥ पुनस्तयोर्विभेदश्च भेदिमात्रस्ततो भवेत् ॥ ८१ ॥ भेदिनश्चैवं भेदस्य विशेषो यदि गम्य
ते ॥ अभेदाभेदिनोश्चैवं किं भेदो भेदभेदयोः ॥ ८२ ॥ विशेषेणैव सर्वत्र यदि व्यवहृतिर्भवेत् ॥ कल्पनागौरवायैव किं भेदः कल्प्य
ते तदा ॥ ८३ ॥ ऐक्यस्य प्रतीत्यभावेन भेद एव गवाश्वयोः ॥ स एव तित्रतो नो हि विशेषो नाम मन्यते ॥ ८४ ॥ सच्चिदादिरपर्याय सिध्यर्थं
माथिनसिद्धि ॥ अंगीकार्यो विशेषोऽयं यद्य सत्यविशेषणं ॥ ८५ ॥ पृथक् पृथग्वा रयितुं शब्दा नरमितीर्यते ॥ मायाविशेषत्वरहि
तविशेषणाविशेषितः ॥ ८६ ॥ सत्यस्यापि स्वतस्त्वात्तथा चेदनवस्थितिः ॥ यदि सत्त्वे विशेषो न न तदुक्तिर्भवेत्तदा ॥ ८७ ॥ ल
क्ष्यते चेत्तेन लक्ष्यं इत्यपि स्याद्विशेषितः ॥ पुनः पुनर्लक्षणया भपि स्यादनवस्थितिः ॥ ८८ ॥ यद्यक्षरत्वविशेषित्वं स्याद्गी
कृतमेवं ते ॥ असार्वज्ञादिराहित्यमप्येवं तत्र विष्यति ॥ ८९ ॥ तदा सार्वज्ञमेव स्याद्भावार्थत्वात्तयोर्द्वयोः ॥ यदि नैतादृशेया
त्यमसत्त्वखलानिवर्तनात् ॥ ९० ॥ अर्थसत्त्वात जानतादेश्च स्यादसत्तादि किं तदा ॥ अनंतपदविरोधित्वं यद्य स्याभ्युपगम्यते ॥
९१ ॥ अनैश्वर्यविरोधित्वमप्येयं किं निवार्यते ॥ अखंडखंडनादेवं विशेषोऽखंडवादिना ॥ ९२ ॥ खंडितेनापि मनसा स्वीकार्यो
नन्यथागतेः ॥ अखंडखंडवादिभ्यां खंडाखंडेन चैव तत् ॥ ९३ ॥ महादरेणाचिरासि विशेषो धार्य एव हि ॥ निदर्शितोऽन्यथे
गतेर्भगवानत्यृषिसत्तां ॥ ९४ ॥ गुणानामादरेणाह तत्र न नभिहितात्त्वयः ॥ यदशेषविशेषाणां मुक्तिः सामान्यतो
भवेत् ॥ ९५ ॥ परैकेनाप्युत्तरेण विशेषावगतिर्भवेत् ॥ यतोऽशेषविशेषाणां वक्तुं नास्ति वचः कता ॥ ९६ ॥ अतः साम्य

थेऽदुर्गमोऽखिलमानवेः ॥ मद्भानान्यत्र तत्ताकारे प्राप्नोति परमाणुतंः ॥ ५० ॥ इति प्रकाशयत्त्विश्वपतिराह प्रमेयतां ॥ निखि
लस्यापि विदस्य गतिसामान्यमंजसा को नाम गतिसामान्यमनन्तागमसंपदः ॥ ज्ञानस्य यं मतं ब्रूयात्तमेकं बादरायणं ॥ ५२
अन्योप्यल्पमतिः शाखाचतुष्टयं चर्गं तवस्क ॥ ज्ञानन्तु मितत्वेन ब्रूयात्तस्य प्रसादतः ॥ ५३ ॥ इति मुख्यतयाशेषगतिसाम
न्यवित्प्रभुः ॥ प्रतिजज्ञे हृदयस्माद्धवानामपि पूर्यते ॥ ५४ ॥ अतो निखिलवेदानां सिद्धयवसमन्वयः ॥ इति रूढापिताथैं पि
४३ पृथक्त्वाह समन्वयं ॥ तत्र प्रथमतोन्यत्र प्रसिद्धानां समन्वयः ॥ शब्दानां वाच्यरावात्र महामल्लेशभागवत् ॥ ५५ ॥ इतोत्यस्य
थिकत्वेलु पिस्वेपादोहितस्यलु ॥ महासमन्वये तस्मिन्नाधिकतोऽखिलस्य हि ॥ ५६ ॥ ब्रह्मैवाधिकृतस्तत्र मुख्यतो न्येयथा
क्रमं ॥ दुर्गमत्वाच्च नैवात्र प्राधान्येनोदितोंजसा ॥ ५७ ॥ अतोन्यत्र प्रसिद्धानां शब्दानां निर्णायायतु ॥ प्रवृत्तः प्रथमं देवस्तत्र
तद्दाद्यो गुणाः ॥ ५८ ॥ ईशिष्येवेतिनिणिउता: श्रुतियुक्तिसमन्वयात् ॥ दैवतांतरगाः सर्वे शब्दा इति निमिलतः ॥ ५९ ॥ वि
ष्णुमेवंवत्वस्थालसंगादुपचारतः ॥ अन्यदेवान्यदंतीह विशेषगुणवत्फलः ॥ ६० ॥ विष्णुरेव परं ब्रूफरेवमन्येष्वशेष ४३
तः ॥ इत्यन्यत्र प्रसिद्धोनुशब्दराशेरशेषतः ॥ ६१ ॥ ज्ञातिसमन्वये विष्णोर्लिंगैर्द्वेषिसमन्वयः ॥ तेषामन्यगतत्वेतुल
स्यात्सम्यक्समन्वयः ॥ ६२ ॥ इत्येयोशेषलिंगानां ब्रह्मण्येवसमन्वयः ॥ आहोभयगतत्वं च स्यादितो लिंगशब्दयोः ॥ ६३ ॥

इति संशयनुत्यर्थमुभयत्रप्रतीतितः ॥ शब्दानां वर्तमानानां सलिंगानां विशेषतः ॥ ६४ ॥ समन्वयो हराववस्य नैवान्यत्र मु
ख्यतः ॥ शब्दालिंगानि चयतो नैवान्यत्र स्वतंत्रता ॥ ६५ ॥ अस्वतंत्रेषु शब्दस्य वृत्तिहेतुर्नमुख्यतः ॥ यतोतोयदधीना स्वश
ब्दार्थत्वमुपागताः ॥ ६६ ॥ अत्यल्पे नेव शब्दस्य वृत्तिहेतुगुणेन तु ॥ अयोयथादाहकत्वं स्वरवशः स्वतंत्रतः ॥ ६७ ॥ मुख्यश
ब्दार्थ इति हि स्वीकर्तव्यो मनीषिभिः ॥ इत्याहैवं च शब्दानां नारायणसमन्वये ॥ ६८ ॥ सिद्धेप्यशेषशब्दानां नकथंचन युज्यते ॥ वि
रोधाद्वरत्वादेरपि प्राप्तिर्यतो भवेत् ॥ ६९ ॥ इति चेद्वरत्वादिद्विविधं ह्युपलभ्यते ॥ परस्यावरताहेतुर्यत्स्वयं परवस्तु ॥ ७०
सोपिह्यवरशब्दार्थो यथा राजाजयी भवेत् ॥ अन्योवरत्वानुभवीतयोः पूर्वोक्तिके शवे ॥ ७१ ॥ द्वितीयाजीवरत्वास्ति स्वतंत्रा
न्नहि दूषणं ॥ हरेरेवमशेषेण सर्वशब्दसमन्वयो ॥ ७२ ॥ उक्तेविरोधहीनस्य स्यात्समन्वयुतायतः ॥ अतोशेषविरोधा
नां हतेशेन निराकृतिः ॥ ७३ ॥ समन्वयाविरोधाभ्यां संजातेवस्तुनिर्णये ॥ किं मया कार्यमित्येवस्याद्बुद्धिरधिकारिणः ॥ ७४
तत्र भक्तिविधानार्थं भक्त्यानर्थसंततो ॥ उक्तायं शक्तिदाढ्याय शेषेषेषणोन्वये ॥ वक्तव्योपासना नित्यं कर्तव्येत्याद
रेणहि ॥ सोपासनाच द्विविधा शास्त्राभ्यासस्वरूपिणी ॥ ७६ ॥ ध्यानरूपा परा चैव तदंगं धारणादिकं ॥ तत्त्वोभयात्मकं चेवपा
दे स्मिन्बादरायणः ॥ ७७ ॥ आहोपासनमप्येवं विस्मराच्युतिपूर्वकं ॥ पृथगस्पष्टि शब्दत्वमनिराशिति समुच्चयः ॥ ७८ ॥
विशेषदर्शनं कार्यं लोपोनानोक्तिराश्रुता विभ्रमोपाहति लिंगमनवस्थाविशेषिता ॥ ७९ ॥ अप्रयोजनतात्वातिप्रसंगो

दूरसंश्रयः ।। विशिष्टकारणांचेष्टादृष्टवैरूप्यमुन्नतिः ।। ८० ।। अनुक्तिरप्रयत्नत्वं दृढबंधपराभवौ ।। पुंसाम्यं प्राप्तसं
त्योगः कारणान्निर्णयो भ्रमः ।। ८१ ।। विशेषदर्शितालोपो गुणसाम्यं पृथक्कृतिः ।। अगम्यवर्त्मसंधानमिष्टफलम
कल्पना ।। ८२ ।। उभयवैरूप्यमंगत्वमविशेषदृशिः क्रिया ।। युक्तयः पूर्वपक्षस्थाः स्वजेयत्वं विधिक्रिया ।। ८३ ।। महा
त्म्यमल्पशक्तित्वं यथायोग्यफलं भवः ।। फलसाम्यविशेषश्च गुणाधिक्यं प्रधानता ।। ८४ ।। यथाशक्तिक्रियासं
धिः प्रमाणबलमानतिः ।। कारणकार्यवैशेष्यं स्वभावो वस्तुदूषणं ।। ८५ ।। प्रतिक्रियाविरोधश्च प्रतिसंधिर
नूनता ।। संस्कारपाटवं स्वेच्छानियतिर्वस्तुवैभवं ।। ८६ ।। विशेषोक्तिरमानत्वं प्रथान्यप्रीतिरागमः ।। स्कं स्थिरबुद्ध
त्वमाप्तिरनादिगुणविस्तरः ।। ८७ ।। साधनोत्तमता नानादृष्टिः शिष्टिरनूनता ।। अविघ्नत्वं विरोधो च गुणवैशेष्य
मागमः ।। ८८ ।। सिद्धांतनिर्णये ह्येता युक्तयो व्याहताः सदा ।। यथाशास्त्रस्यखिलाद्वेदान्विशायोपासनं भवेत् ।।
८९ ।। तत्राखिलस्य विज्ञप्तिः सम्यक् कुर्ब्राह्मणएव हि ।। तदन्येषां यथायोगमखिलज्ञप्तिरिष्यते ।। तावतोपासने
योग्यो भवेदखिलः पुमान् ।। महत्त्वस्य परं पारं विदितेव जनार्दनः ।। ९१ ।। स्तोष्यतामतितुष्टत्वमिति नास्त्येव
नारद ।। किंतु निश्चलया भक्त्या ह्यात्मज्ञानानुरूपतः ।। ९२ ।। यस्तोष्यति सदा सम्यक् तुष्टस्तस्य सदा हरिः ।। ९३ ।।

सर्वा इमाः प्रजाः ।। ३६ ।। यस्मिन्नियमतो दुःखहानि प्रत्यक्षतो भवेत् ।। धावंते वत मुद्दिश्य राजाद्यमखिलाः प्रजाः ।। ३७ ।।
अनुमागम्यतो मोक्षो यदि तस्यानुमैव हि ।। दृष्टपूरुषवन्मोक्षदातृत्वविनिवारयेत् ।। ३८ ।। तच्छास्त्रगम्य एवैको मोक्षदो भ
वति ध्रुवं ।। शास्त्रागम्यश्च नान्योस्ति मोक्षदस्तेन केशवात् ।। ३९ ।। मोक्षदो हि स्वतंत्रस्यात्परतंत्रः स्वयं यतो ।। वर्तमानः
कथं शक्तः परमोक्षाय केवलं ।। ४० ।। अन्याश्रयेण यद्दोषदृष्ट्या मोक्षः स एव हि ।। तेनानन्तुसतो मोक्षं न दद्यादन्यवाक्य
तः ।। ४१ ।। अतस्तदर्थमपि सज्ञेयो विष्णुर्मुमुक्षुभिः ।। यमेवैष वृणुते इति श्रुत्या तमेवेति च सादरं शास्त्रयोनित्वमस्यैव ज्ञायते
वेदवादिभिः ।। यस्मान्न विदुरमलाः इत्यक्तं खलु समुद्गगः ।। ४२ ।। तदेव ब्रह्म परमिति श्रुत्या वधारितः ।। यतः प्रसूतेति ततः
स्पष्टिमाह ततो हरिः ।। ४३ ।। शास्त्रयोनिरन्यो नान्योस्ति मुख्यतस्त्वित्तिगम्यते ।। शास्त्रयोनित्वमेतस्य ज्ञायते हि समन्व
यात् ।। ४४ ।। समितस्तुपसर्गेण परमुख्यार्थतोन्यते ।। सर्वपरममुख्यार्थो नारायण इति श्रुतेः ।। ४५ ।। निर्धारणाय नान्व
त्वमिति विदयतिर्जगौ ।। कथं समन्वयो ज्ञेयः स्वल्पमात्रावादितो गुणः ।। ४६ ।। वेदाह्यनंतरइति हि श्रुतिराह ह्यनंतता ।। अ
नंतवेदनिधिशेति महाप्रलयवारिधेः ।। ४७ ।। उत्तरणाय मत्स्यस्य तज्ज्ञेयो त्र समन्वयः ।। इत्यशक्या यतोदार्यसंज्ञा हि करुणा
करः ।। ४८ ।। तत्राक्येन्नारणत्वेपि ह्यागमापारवारिधेः ।। नित्यश्रियतमये वाय रोमकूपलयोदितो ।। ४९ ।। यद्यप्यत्रैषवेदा

एवंभेदेदोषत्वंवाभात्रास्यत्पत्तिमित्रता ।। नारायणेनमुक्तानामपिसम्यग्गितिस्थितिः ।। ५ ।। भेदाभेदप्यदेभे
नदोषाणामपिसंभवः ।। निर्दोषत्वंरमायाश्चतदनंतरतास्तथा ।। ६ ।। ब्रह्मासरस्वतीवींद्रशेषरुद्राश्चतस्त्रियः ।। शक्रक
मोतदन्येचक्रमान्मुक्तावपीत्थं ।। ७ ।। सन्निधानादितिज्ञेयोनिर्णयोहरिणास्वयं ।। एतद्विरोधियत्सर्वंतमसेतत्प्राय
केवलं ।। ८ ।। अथर्वतमोविज्ञालीतिग्राहश्रुतिलिस्फुटं ।। इत्येवश्रुतयोन्नेयाः पंचरात्रतथाखिलं ।। मूलरामायणंचैव
४५ भारतस्मृतयोखिलाः ।। वैष्णवानिपुराणानिसात्वयोगोपरावपि ।। ब्रह्मतर्कश्चमीमांसेत्यनंतः शब्दसागरः ।। अ
नंतसुक्तयश्चैवप्रत्यक्षागममूलकः ।। ११ ।। प्रत्यक्षमेश्वरंचैवरमादीनामन्नेषवत् ।। मुक्तानामप्यमुक्तानामेतमेवार्थ ४५
मुत्तमं ।। १२ ।। अन्यावकाशरहितंप्रकाशयतिसादरं ।। एतदेवचसच्छास्त्रंदुःशास्त्रंतुततःपरं ।। सच्छास्त्रमभ्यसेन्नि
त्यंदुःशास्त्रंतुपरित्यजेत् ।। असंशयेनतत्त्वस्य निर्णयेब्रह्मदर्शनं ।। सम्यग्विषमविज्ञानतारतम्यानुसारतः ।। फलं
भवेत्तारतम्यात्सुखदुःखात्मकंनृणां ।। १४ ।। सम्यक्त्वाधिकविज्ञानात्सुखाधिक्यंभवेन्नृणां ।। अतोयथात्मशक्त्ये
वश्रवणंमननंतथा ।। १५ ।। कृत्वाथकुर्वन्नपिवानिदिध्यासनमाचरेत् ।। विषयेषुचसंसर्गंशाश्वतस्यचसंश्रयात्
।। १६ ।। मनसाचान्यादाकांक्षात्परंमपितिपद्यते ।। इतिभारतवाक्यंहिलेनैतद्दोषवर्जितः ।। १७ ।। सदैवोपासनायुक्तो

वारुद्देवंप्रपश्यति ।। दोषाअनादिसंबद्धास्तेमुक्तिपरिपंथिनः ।। १८ ।। संत्येवप्रायशः पुंसुसुमुक्तेनमेक्षोनजायते ।। स
र्वैतएतेजीवेषुद्वयंतेतारतम्यतः ।। १९ ।। रजूनामेकएवास्तिपरमोत्साहवर्तनं ।। सगुणात्मतमात्रत्वान्नूर्जत्वेनवि
रुध्यते ।। अतोविष्णोपराभक्तिस्तदक्तेषुरमादिषु ।। तारतम्येनकर्तव्यापुरुषार्थमभीप्सिता ।। २१ ।। स्वादरः सर्वजंत
नांसंसिद्धोहिस्वभावतः ।। ततोधिकः स्योतमेषुतदाधिक्यानुसारतः ।। २२ ।। कर्तव्योवासुदेवांतेसर्वथाशुभमिच्छ
ता ।। नकदाचित्त्यजेतचक्रमेणेनविवर्धयेत् ।। २३ ।। समेषुस्वात्मवत्स्नेहः सत्त्वन्यत्रततोदया ।। कायैवमापरोक्ष्येण
दृश्यतेक्षिप्रमीश्वरः ।। २४ ।। ततमोघंव्रजेद्विष्णुसमत्वंयोनुपश्यति ।। रमाब्रह्मशिवादीनामपिमुक्तोकथंचन ।।
किमुताधिक्यदृष्टेस्तद्गुणाभावमतेरपि ।। दोषवेतुरसदस्युदुष्टुरष्टुस्तथाभयोः ।। २६ ।। इत्याहसद्भुतिस्तेनसप्रोक्तो
गुणसयुतः ।। उपासीनहरिंद्विष्टामुक्तिस्तेनैवजायते ।। २७ ।। द्वेषाद्यमुक्तिकथनंश्रुतिवाक्यविरोधितत् ।। धिप
योयोतुरामस्यविमुखत्वाभिरामिणः ।। २८ ।। अस्तिद्रोहयदेनित्यमंधेतमसिसंस्थिताः ।। हरिद्विषस्तमोयांतियेचै
वतद्भेदितः ।। २९ ।। तन्निर्गुणत्वेवतारस्यदोषविदोपिच ।। इत्यादिश्रुतिसंदर्शाद्द्विषस्तमईयते ।। ३० ।। हिरण्य
कशिपुश्चापिभगवन्निंद्यातमः ।। विविक्षुरत्यागात्सूनोः प्रल्हादस्यनुभावतः ।। ३१ ।। यदनिंदत्पितामेमहात्वदक्ल
मयिचाघवान् ।। तस्मात्पितामेपूयेतदुरंताद्दुस्तराद्यात् ।। ३२ ।। निंदांभगवतः श्रृण्वंस्तत्परस्यजनस्यवा ।। ततोनापै

त्तियः सोपियात्यथः स्फुट्टतात्युतः ॥ ३३ ॥ अवजानंतिमांमूढामानुषीं तनुमाश्रितं ॥ परंभावमजानंतोममभूतमहे
श्वरं ॥ ३४ ॥ मोघाशामोघकर्माणोमोघज्ञानविचेतसः ॥ राक्षसीमासुरींचैवप्रकृतिंमोहिनीश्रिताः ॥ ३५ ॥ मामात्मप
४६ रदेहेषुप्रद्विषंतोभ्यसूयकाः ॥ तानहंद्विषतःक्रूरान्संसारेषुनराधमान् ॥ ३६ ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनि
षु ॥ आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि ॥ ३७ ॥ मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं ॥ योद्विष्याद्विबु
धश्रेष्ठंदेवंनारायणंप्रभुं ॥ ३८ ॥ कथंरूपंवेद्ध्यन्न्आलोकोतस्यकस्यचित् ॥ योद्विष्याद्विबुधश्रेष्ठंदेवंनारायणंप्रभुं ॥ ३९
मज्जंतिपितरस्तस्यनरकेशाश्वतीःसमाः ॥ इत्यादिवाक्यसंदेहाद्वेषिणस्तमएवतु ॥ ४० ॥ नैवमोक्षइतिप्राहुर्लोकाय ४८
तमतेस्थिताः ॥ ४१ ॥ भोगशरीरपर्यंतंभस्मीभावस्ततोभवेत् ॥ ४१ ॥ इतितत्केनमानेनदृष्टंप्रत्यक्षवादिनः ॥ न
हिप्रत्यक्षमानेनमोक्षाभावविवक्षीयते ॥ ४२ ॥ घटतेमुक्तिदृष्टिस्तुपुरुषेणमहीयसा ॥ नेतिवक्तुंमहत्वंतुकथंचनन
विद्यते ॥ ४३ ॥ साधयन्सर्वसामान्यंकथमेवविशेषवान् ॥ दृश्यतेपुरुषाल्लोकेपारावारविदोपिच ॥ ४४ ॥ अ
परोक्षदृशोयोगनिष्ठाश्चामलचक्षुषः ॥ प्रत्यक्षदेवतादृष्टास्तत्प्रसादाप्रभृतयः ॥ ४५ ॥ ज्ञानविज्ञानपारज्ञानिषिध्यं
तेकथंनभि ॥ दृश्यतेचातिमाहात्म्यंतेषामतिमहोजसां ॥ ४६ ॥ यदितेपिनिषिध्यंतेकिंनोकिंस्तेनिषिध्यते ॥

इत्यादिवाक्यसंदर्भात्तुयथायोग्यविलक्षणता ॥ आत्मज्ञानानुरूपत्वंयथाशक्तिविचारणात् ॥ भेदःक्ष्तत्वेधिगं
तव्यःस्वाध्यायाध्ययनंभवेत् ॥ ९३ ॥ इत्यादिवाक्यवैयर्थ्यमन्यथाननिवार्यते ॥ अद्यापितेनदेवाद्यः श्रएवंतम
न्वतेसदा ॥ ९४ ॥ ध्यायंतिचयथायोगंतथाप्यावस्तुनिर्णयात् ॥ श्रवणंमननंचैवकर्तव्यंसर्वथैवहि ॥ ९५ ॥ मति
श्रुतिध्यानकालविशेषंगुरुरूतमः ॥ वेतितस्योक्रमंमार्गेणकुर्वतःस्यात्त्विदर्शनं ॥ ९६ ॥ श्रवणाद्दृष्टतत्वस्यमननं
ध्यानमेवचविशेषानंदसंप्राप्त्यान्यस्यैतानिदृष्टये ॥ ९७ ॥ यदितादगुरुर्नास्तिनिरुतश्रवणादिकं ॥ प्रसिद्धं
तानुसारेणनिर्णयज्ञस्सिमाचरेत् ॥ ९८ ॥ श्रवणादिविनानैवक्षणातिष्ठेदपिक्वचित् ॥ अत्यशक्येतुनिद्रादौपुनरवस
माचरेत् ॥ ९९ ॥ अभावेनिर्णयज्ञस्यसच्छास्त्राण्येवसर्वदा ॥ श्रण्वयाद्यदिसद्ज्ञानप्राचुर्यमुपलभ्यते ॥ ३०० ॥ मह
द्भ्योविदुषत्केभ्योयथाशक्तिचसंन्यायात् ॥ छिंद्यात्स्वतोधिकास्रावेरायमेवसमभ्यसेत् ॥ ३०१ ॥ ब्रूयादपिचवेशे
ष्येभ्यःसत्सिद्धांतमहापयन् ॥ अशेषगुणपूर्णत्वंसर्वदोषसमुज्झितं ॥ ३०२ ॥ विष्णोरन्यच्चतत्तंत्रमितिसम्यग्वि
निर्णयं ॥ स्वतंत्रत्वंसदातस्यतस्यभेदश्चसर्वतः ॥ अदोषत्वस्यसिध्यर्थंयदभेदेतदत्ययः ॥ ततत्रत्वंचमुक्तानांअ
पितद्गुणमूर्तये ॥ ३०३ ॥ मुक्तानामपिभेदश्चनहिभिन्नमभिन्नतां ॥ गच्छदृष्टंक्वचित्तस्याप्यभावोनुभवोयतः ॥ ३०४

नमन्यंतेमुद्गलंसदुःखाभावःस्फुरंवस्थिति ॥ यात्राभोगातिरेकेणदुःखाधिक्यस्यदर्शनात् ॥ ६१ ॥ सुखस्याभावता
केननचस्यात्किंविपर्ययः ॥ यदिभावेपि कश्चित्स्यात्तस्यैवाभावता कुतः ॥ ६२ ॥ यदिसर्वेप्यभावास्युरन्योन्याभिति
भावता ॥ अभावाभावतेवस्यात्किं नर्छिभतदाभवेत् ॥ ६३ ॥ भावत्वंविधिरूपत्वंनिषेधत्वानभावता ॥ निषेधस्य
निषेधोपिभावएवबलाद्भवेत् ॥ ६४ ॥ प्रथमप्रतिपत्तिस्तुभावाभावनियामिका ॥ नचपुद्गलविज्ञानंमोक्षदंभवतिक
४७ चित् ॥ ६५ ॥ अस्यात्तस्यात्पुद्गलस्यज्ञातोपिसुखदोनहि ॥ नहिदुःखिपरिज्ञानादुःखिविनिवर्तते ॥ ६६ ॥ यदिपुद्ग
लविज्ञानाद्दुःखीस्यात्कथंचन ॥ देहवानपिनादुःखीकिंज्ञानदुःखरसदा ॥ ६७ ॥ ईशाद्युपसनुसारेणास्यात्काल्लादी
न्नावादिना ॥ कर्महेतुत्वमपितुनिश्चेतव्या नहिक्कचित् ॥ ६८ ॥ अशेषदुःखविलयेनेदानींकारणंयथा ॥ तथोत्तरंच
नैवस्याद्दृष्टिपूर्वानुमायतः ॥ ६९ ॥ नरूकस्यान्यस्यविज्ञानंतन्नीतिज्ञनकंयदि ॥ तथैवबंधहानिस्यादितिकिंनाम
दूषणं ॥ ७० ॥ स्वज्ञानाद्बंधहानिस्तुदृश्यतेलस्यकुत्रचित् ॥ अहिंसायाश्चधर्मत्वंकेनमासेनगम्यते ॥ ७१ ॥ हिंसा ४७
यास्वधर्मत्वभिस्फके स्यात्किमुत्तरं ॥ धर्मस्यसुखहेतुत्वमपिकेनावगम्यते ॥ ७२ ॥ हत्यायंमोक्षहेतुत्वंतुकुतोनाना
निवार्यते ॥ नचशून्यपरिज्ञानाछून्यभावनयापिच ॥ ७३ ॥ मोक्षःकथंचनभवेद्यदीदानींकथंनसः ॥ परप्रसाद

नेच्छोस्तुविलंबोनामयुज्यते ॥ ७४ ॥ पुमिच्छाधीनतानेचेद्विलंबःकिंकृतोभवेत् ॥ अन्यत्रापिविलंबास्तुस्युरीशेच्छा
निमित्ततः ॥ ७५ ॥ अन्यथाकारणंचेत्स्यात्किंकार्येनोपजायते ॥ कारणेसतिकार्यस्यभावःसुनियतोस्यहि ॥ ७६ ॥
विज्ञानवादिनश्चैवविज्ञानाद्वैतवेदनात् ॥ विज्ञानभावनाचैवमोक्षोनघटतेक्कचित् ॥ ७७ ॥ अतत्ज्ञानस्यबाह्य
चक्षणिकत्वस्यवेदनात् ॥ भाववाञ्छोरुमार्गेणमानाभावान्नमुच्यते ॥ ७८ ॥ प्रकृतेःपुरुषस्यापिविवेकोमुक्तिसाध
नं ॥ इतिसांख्यानचेतस्मिन्मानमीशप्रसादतः ॥ ७९ ॥ श्रुतयस्मृतयश्चैवयदेशास्यप्रसादतः ॥ वदंतिनियमान्मुक्तिं
णा नम्रतेतःकुतोस्यवेत ॥ ८० ॥ कामादयोगास्यपादात्रपीशस्यप्रसादतः ॥ मुक्तिंतुवा अप्याहुर्भोगादेवचकर्मणां ॥ ८१ ॥
ग्रे क्षयंप्राहुकुतश्चैतपरस्तेजगदीश्वरे ॥ भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः ॥ ८२ ॥ क्षीयंते चास्यकर्माणितस्मिन्दृ
ष्टेपरावरे ॥ भद्रलेहृदयग्रंथिछिद्यतेसर्वसंशयः ॥ ८३ ॥ क्षीयंतेचास्यकर्माणिदृष्टएवात्मनीश्वरे ॥ इतिश्रुतिपुरा
णादिवचनेभ्योन्यथामतेः ॥ ८४ ॥ नचयाश्रुयताद्युक्तंशिवादीनामनुग्रहात् ॥ नान्यःपंथाइतिह्युक्तंपुरुषज्ञानतःश्रु
ते ॥ ८५ ॥ सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि ॥ एवपुरुषशब्दश्चप्रयुक्तोब्धिशायोहरौ ॥ ८६ ॥ ——स्येशेकाश्च
नतस्यनाभमहद्यशः ॥ इतिचाधिपतिस्तस्यप्रतिषिद्धःस्वयंश्रुतौ ॥ ८७ ॥ विश्वतःपरमान्नित्यंविश्वंनारायणंहरिं ॥

इति सर्वाधिकत्वोक्त्या समोपि विनिवारितः ।। ८८ ।। समाधिकस्य राहित्याच्चोपचारः पुमान्स्मृतः ।। पुरुष एवेदं
सर्वं यद्भूतं यच्च भव्यं ।। ८९ ।। उतामृतत्वस्येशानो यदन्नेनातिरोहति ।। मुक्तामुक्तपरेशत्वमिति स्पष्टं लसत्श्रुतिः ।। ९० ।।
अमृतेशानवचनात्सर्वस्येशानतोदितः ।। यदि सर्वत्वमुदितं मुक्तेशाद्यतिलं कथं ।। ९१ ।। उतशब्दो वदेदेष खलीशत्वस्य समु
च्चयं ।। पुरुषोत्तवेदव्यास इति ब्राम्हणं च हलं प्रति ।। ९२ ।। एतावानस्य महिमेति महिम्नैव चोदितं ।। सोमृतस्याभयस्येशो
४६ मर्त्यमन्नपदं त्यजन् ।। ९३ ।। इत्युक्त्वाधियत्यं तु पूर्वार्थे मनुष्यं च ।। उतामृतस्येशा इति ।। विधत्ते मुक्तिगेशत्वं ।। ९४ ।। अतो वि
ष्णुपरिज्ञानादेव मुक्तिर्नचान्यतः ।। तद्यथेतिश्रुतेश्चैव तत्तः कर्मक्षयो भवेत् ।। ९५ ।। यथैधांसि समिद्धोग्निर्भस्मसात्कु
रुतेर्जुन ।। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ।। ९६ ।। सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।। अहं त्वा स
र्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।। ९७ ।। इत्यादिभगवद्वाक्यै रुक्तार्थश्चावसीयते ।। नित्यनैमित्तिकं कर्म कुर्वन्नन्यत्परित्य ४६
जन् ।। ९८ ।। मुच्यते संसृतेश्चैव तदप्येतेन निराकृतं ।। विद्यां चेतीममेवार्थं विषयं भवाहवेदरात् ।। ३९९ ।। विना कर्म न मोक्षः
स्याद्धानेनेत्यपि सा श्रुतिः ।। नान्यः पंथा इतीहैव निवारयति सादरं ।। ४०० ।। अन्यथोपासनमपि तमेवमिति वादिनी ।। नि
वारयत्सा दूरेण न प्रतीकइति प्रभुः ।। ४०१ ।। अंधं तमः प्रविशंति ये त्वविद्यामुपासते ।। इति श्रुतिविरोधाच्च नान्यथोपा

यदुक्तवाक्यप्रामाण्यं प्रत्यक्षेणोपलभ्यते ।। ४७ ।। नरादयोपि लभ्यन्ताः सदा सत्या भवंति हि ।। अप्रामाण्यं तदुक्तेश्च
वृथावाचावसीयते ।। ४८ ।। न हि प्रयोजनं किंचित्परलोकनिवारणात् ।। वृथा वाचं वृथाहन्याद्यदि तस्य किमुत्तर
।। ४९ ।। स्वजीवनविरोधाय वदन् किं नाम बुद्धिमान् ।। प्रमाणे संशयः किं स्यात्तयोः पुरुषयोरपि ।। ५० ।। स्वजी
वनविरुद्धोक्तिरज्ञो दृष्टस्य चाप्रियः ।। यश्चातीद्रियदेवोक्तिश्चोक्तदृष्टपरावरः ।। ५१ ।। अतीतानागतं सर्वलोकानु
भवमर्पयन् ।। अतः प्रत्यक्षगाम्यत्वाद्दृढमात्वस्य च स्फुटं ।। ५२ ।। यद्यागमस्य नो मात्वमक्षजस्य तथा भवेत् ।। यद्यक्षग
स्य मात्वं स्यादागमस्य कथं न तत् ।। ५३ ।। लोकवाक्याद्विशेषश्चाव्यभिचारेण सिध्यति ।। अस्ति मोक्षोपि धर्मेण य
थार्थज्ञानतोपि च ।। ५४ ।। प्रामाण्यमनुमायाश्च तिनस्यात्यत्वसाध्यते ।। तद्वाक्या धर्मसज्ज्ञानविज्ञप्तिप्रवितीतिच
।। ५५ ।। धर्मो हि सा परो मान्यो ज्ञानं पुद्गलदर्शनं ।। इति जैनाः कथं तत्स्याद्धमाणामनुमानतः ।। ५६ ।। विषया अतिसूक्ष्मि
तत्कर्ष्टा प्रत्यक्षमिति गीयते ।। प्रत्यक्षशब्दानुसारादनुमेति प्रकीर्तिता ।। ५७ ।। आसमंतादमयति धर्माधर्मो परं
पदं ।। यच्चापि तीद्रियं त्वन्यत्तेनासदिगमः स्मृतः ।। ५८ ।। एतेन कारणेनैव तत्तन्मानत्वमिष्यते ।। स्वरूपं हि तदुक्ते धाम
न्यथा स्विच्छिमानतः ।। ५९ ।। अनोनुमाक थं धर्मे पुद्गलं चापि दर्शयेत् ।। स्वरूपे पुद्गलमयोक्तादोषात्त्रानंदमेव च ।। ६०

श्रि

विश्वामित्रः कस्तनवत् ॥ वैवस्वतो मनुश्चान्ये सिंहपश्चादन्ये लतोवराः ॥ च्यवनोतथ्यवैन्याश्च नाभाविंदुश्च हैहयः ॥ तद्वज्ञविश्रा
उत्तमोन्यविशेषो त्रापि कश्चन ॥१७॥ तद्वत्प्रियव्रतश्चापि तदन्या ऋतदेवताः ॥ पर्जन्यमित्रांतराले तदन्ये तु शतावराः ॥१८॥ एते
ऽप्यधिभ्य काश्चित्सुसदा मुक्ता विशेषतः ॥ तत्समो नास्ति परमो हरिरेव न चापरः ॥१९॥ संहितायां बृहत्यां तु स्वयं भगव
तोदितं ॥ तदेतदखिलं प्राणा अहंकारिकमेव च ॥२०॥ इंद्रादनंतरो दृष्टिरपि योग्यानुसारतः ॥ सम्यग्गुरुप्रसादश्च मुख्यता दृष्टि
कारणं ॥२१॥ श्रवणादि च कर्तव्यं नान्यथा दर्शनं क्वचित् ॥ गुणाधिकं गुरुं प्राप्य तद्धीनं नामुया क्वचित् ॥२२॥ विपर्यये तु
कर्तव्यः सर्वथा शुश्रूषमिच्छता ॥ समे विकल्प एव स्यात्पूर्वो तुत्ताच सर्वथा ॥२३॥ तदुत्तमगुरुप्राप्त्यै पूर्वानुज्ञानमुच्यते ॥ गुरवस्त्व
खिलानां च विधीचेवु सुरस्थली ॥२४॥ देवता भगवान्विष्णुः सर्वेषामविशेषतः ॥ तस्य सादनमुक्तिस्यान्नान्यथा तु कथंचन
॥२५॥ स्वोत्तमास्तु क्रमेणैव सर्वेषां गुरवः स्मृताः ॥ उपदेशो ब्रह्मणस्तु सर्वेषामेव मुक्तये ॥२६॥ साधनस्याधिको भक्तिर्नैवा
न्यतादृशं क्वचित् ॥ भक्तिश्चैव हरावेव मुख्या न्यत्र यथाक्रमं ॥२७॥ स्वाधिकाश्चैव सर्वत्र स्वोत्तमेषु क्रमेण च ॥ अनुवर्ततेच
सा भक्तिर्मुक्तावानंदरूपिणा ॥२८॥ तस्सर्वे कोपासनेन कर्तव्या मुक्तये गुरोः ॥ २९ ॥ ३२९ ॥ छ ॥ छ ॥ छ ॥
॥ श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रानुव्याख्याने श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते तृतीयाध्यायस्य तृतीय
पादः ॥ ३।३ ॥ छ ॥

श्रीगुरुभ्यो नमः ॥ ॐ ॥ एवमुपास्तिनिर्दोषा भगवद्दर्शनात्सदा ॥ अपेक्षितफलप्राप्तिर्वारब्धस्यनतिक्रमात् ॥२९॥ देवर्षिमा
नुषादीनां तद्ज्ञात्यनुसारतः ॥ जैमिन्युक्तं मानुषाणां तद्विशेषाश्च केचन ॥३०॥ सामान्यं भगवत्प्रोक्तं देवादीनां विशेषतः
बलवद्बहिरोधिसद्भावे जैमिन्याद्युक्तिरिष्यते ॥३१॥ विकर्मलेपो नैवास्ति सम्यग्दृष्टिमतां क्वचित् ॥ गुणाहानिश्च नैवास्ति ब्रह्म
णस्तु विकर्मतः ॥३२॥ देवतामपि न प्राप्तः छन्दस्य तु कथंचन ॥ प्राप्तं न्हासो भवेत्कापि महतां तु विकर्मणा ॥३३॥ तथापि त
त्कृतमेव तस्मान्नियमोस्ति हि ॥ चंद्रस्य ग्रीवयोश्चैव खोच्छ्वदानपरिग्रहात् ॥३४॥ प्राप्तहानिर्भवेन्नैव क्वचित्महानिः कथंचन ॥ न्हासो
पि मानुषादीनामानंदस्य विकर्मणा ॥३५॥ भवेन्मुक्तौ विशेषेण ख्यात्यात्मापराधतः ॥ ज्ञानोत्तरस्य पापस्य त्वलेप उच्यते
॥३६॥ अश्रुत्वात्किंचास्य न भवेदिति तत्फलं ॥ अत्र ज्ञानफलस्यैव मुक्तौ नियततोच्यते ॥३७॥ प्रारब्धकर्मजस्यैव विषभक्षा
म्नतेरिव ॥ प्राप्तस्याप्यनिवर्तस्य किंचिद्युक्तस्य संविदा ॥३८॥ उपमर्द इहप्रोक्तो देवादीनां यथाक्रमं ॥ सर्वात्मना त्वभोगो हि प्रारब्ध
स्यैव कर्मणः ॥३९॥ न ब्रह्मदर्शनोपि स्यात्फलन्हासस्तु विद्यते ॥ सर्वात्मना फलन्हासो यदि नारब्धकर्मणः ॥४०॥ स्यात्काम्य
विधिवैयर्थ्यमित्युक्तं नियमो भवेत् ॥ एवमाद्यपि संप्रोक्तं तच्च भागवते स्फुटं ॥४१॥ तारतम्यफले नोचेत्ब्रह्मादीनां कथं श्रुतिः
अवृजिनो कामहततत्तिर्मुक्तिनिगद्यते ॥४२॥ आनंदतारतम्यं च तेषां ब्रूयात्पृथक्पृथक् ॥ संसार एव चेदेतत्तारतम्यं न मुख्यतः
॥४३॥ अकामहतशब्दार्थो वृजिनत्वं न नो भवेत् ॥ कामास्य यत्राप्ताः कामास्तत्रमाभते इत्यपि ॥४४॥ इति यल्लक्षणमुक्तं श्रुतिराह

बलीयसी॥ कामाहति ॥ कुतोन्यत्राप्तकामस्य साभवेत्॥४५॥ अप्रयत्नेन कामानामवाप्तिः सापदा भवेत्॥ तदेवाकामहततां कु
तएवान्यथा भवेत्॥४६॥ चेतनस्य त्वसुप्तस्य कुत्र दृष्टा ह्यकामता॥ अव्यक्तिरेवकामानां ननवा नेहस्फुरत्ययोः॥४७॥ यत्कामः ख्या
पमाप्नोति तदेवाख्यापितः पुनः॥ अवशोपि व्याहरति कुतः सुप्तावकामता॥४८॥ सर्वकामानवाप्नोति ब्रह्मणा सहमुक्तिगः॥ पर्वे
तिलत्रजक्षंश्चक्रीडन्रतिमवाप्नुयात्॥४९॥ कामान्नी कामरूपी सन्निमान् लोकांश्च संचरन्॥ आस्तेगायन्सामयुक्तं इत्यादिश्रुतिस
५० द्भुलात्॥५०॥ अकामस्यात्कथं मुक्तः कामायस्य हृदिश्रिता॥ इत्थं तः करणस्थानां कामानां मोक्षरा वहि॥५१॥ आहश्रुतिर्हृदि मे
त्येवनचेद्व्यर्थविशेषणं॥ हृत्स्थैवतेषां श्रयणं इतिपक्षानभासते॥५२॥ मुक्तानां कामितं माहपृथक्कृशरवा क्ष्रु स्फयश्रुतिः॥ अतो
कामहतत्वं तु मुक्तानामेव मुख्यतः॥५३॥ मुख्यार्थस्य यथा त्यागो मायिनामेवभूषणं॥ अपापत्वं अदुःखत्वं चारजि नत्वमिहो
दितं॥५४॥ अप्रियंवर्जिनदुःखं अवंतोदइतीयते॥ तत्कारणत्वात्पापं वा रजिननामकथ्यते॥५५॥ इत्युक्तः स्वयमीशेननामार्थः
शब्दनिर्णये॥ अपापत्वंचनैवास्ति यावत्संसारमस्यहि॥५६॥ आरब्धपापमस्त्येव दुःखं च ज्ञानिनोपिहि॥ तस्मात्तस्मादकामत्वमिति ९०
नाश्रुतकल्पना॥५७॥ अकामहतइत्युक्तेः श्रुतहानिरपिस्फुटा॥ कुत्रचित्कामिनः पुंसः कामाभावात्क्वचित्क्वचित्॥५८॥ इष्टादि
सुखभोगो स्त्रीत्यत्तु भूतिर्हि कुप्यति॥ तस्मादमुक्तिसुखगं तारतम्यं पृथक्पृथक्॥५९॥ उत्क्रायश्चेति मुक्तानां तारतम्यं सुखे श्रुतिः॥
आहेतिपैशालं तच्च वशब्दादेवगम्यते॥६०॥ राधः संसधइत्येवमुक्तरावावगम्यते॥ साधुना विधुना युक्तो मुक्तः साधुपुरामतः॥
स यौवनानित्यमेतस्य मुक्तस्येति युवा पिच॥ फलमध्ययनस्यासतना ध्यायिकरेरितः॥६२॥ निर्दुःखसानंदसंप्राप्त्याचाविष्टरतिगीयते॥

सन्नंभवेत्॥२॥ नचाप्येकत्वविज्ञानादुक्तन्यायेन मुच्यते॥ इति सर्वं प्रविज्ञाय सर्वैस्तत्त्वैः सदागमैः॥३॥ उपासीतहरिं
नित्यं गुणैरेव स्वयोग्यतः॥ ब्रह्मा सर्वगुणोश्चैव क्रियासामान्यतश्च गीः॥४॥ गुणसामान्यतोरुद्रोद्व्यसामान्य
तः परे॥ अधिकारिविशेषेण भक्तिज्ञानसुखादिभिः॥५॥ विशेषो देवतादीनां मोक्षेप्येव विशेषतः॥ नतावता विरो
धोस्ति निर्दोषत्वात्समस्तशः॥६॥ आभासत्वात्परेषां तद्वराणांच सर्वशः॥ यतोवराणां सर्वेपि गुणाः सर्वाः क्रि
या अपि॥७॥ नियमेनैवपूर्वेषां सुप्रसाद निबंधनाः॥ अतः संछिद्यव तेषां नैवेष्यादिः कथंचन॥८॥ नचसंसारि
देवानां कालियता परेरमे॥ सद्यांतरध्यमात्रस्य भोगो नैवक्षयोऽभवः॥९॥ अनारब्धकार्ये भोगो नखिलरेशलिचोदितः
पौनरुक्त्यं नतेनैतउक्तार्थेरितिनिश्चयः॥१०॥ उषाख्यहाचपर्जन्यो मित्रोग्निर्वरुणो विधुः॥ प्रवहोनिरुधंइडोमेरुडोवा
णीचमारुतः॥११॥ उत्तरोत्तरस्वेतेगुणैः सर्वेश्च मुक्तिगाः॥ सूर्यधर्मौ यथा सोमोनतुदक्षो बृहस्पतिः॥१२॥ प्राचीरतिश्चनि
रुद्धसमास्तारा च मित्रवत्॥ सोमवच्चतरूपालु गस्त्र्यतिर्वह्निवद्विराट्॥ पर्जन्यवद्वारुणी च तथा संज्ञा च रोहिणी॥ धर्मश्चमि
त्रवत्तेव प्रावहीपरिकीर्तिता॥१३॥ मित्रपर्जन्यमध्यस्थावश्विनौ विघ्नविप्रपो॥ भृगुरग्निसमो मित्रतन्मध्यत्र ब्रह्मपुत्रकाः
॥१४॥ वरुणात्वंतरास्तत्र नारदः प्रायइडवत्॥ कामः सुपर्णी चोमावद्धौ झोरडवदीरितः॥१५॥ निर्वेतिर्मित्रसद्ग्रो॥

भिः सिद्धैर्महायोगिभिरेव च॥ नित्ययुक्तैर्महाभागैर्विमोहितक्लेशसाध्वसैः॥८०॥ महोत्साहैर्महाधैर्यैः सत्त्वस्थैर्व्यवसायिभिः॥ अ
तीतानागतज्ञानप्रभवाप्ययवेदिभिः॥८१॥ शौचस्वाध्यायसंतोषतपः सत्यदयान्वितैः॥ किमु मर्त्यैर्भयत्रीतिध्वंसमोहरजान्वि
तैः॥ अल्पायुर्वीर्यधीसत्त्वव्यवसायश्रुतिव्रजैः॥ करुणमदाभदादेवं मूढन्यो ज्ञातुमर्हति॥८२॥ ब्रह्मैव किंचिज्जानाति न तदन्यो
हि कश्चन॥ मुक्तानामपि सिद्धानां नारायणपरायणः॥ ८३॥ सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामते॥ स्वयं विरञ्चिर्यतलो
बभूव यदिवादधे यदि वा न॥ सोऽस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद॥८४॥ यस्यात्ममायाविभवं स्वयं गतो नाहं
न भक्तो स्तम्भ थापरे कुतः॥ अस्यापि यं वेत्ति न चेह सम्यगन्ये कुतो देवमुनीन्द्रमर्त्याः॥ ८५॥ नभस्तोमितलत्वाद्ये ब्रह्मादीनां च
स्तत्येनिर्गुणायच सत्काष्टां नाहं वेदापरे कुतः॥८६॥ नाहं परायुर्ऋषयो न मरीचिमुख्या जानन्ति यद्विरचितं खलु सत्त्वसर्गाः॥
८७॥ यन्मायया मुषितचेतस ईश वादे त्यमत्यादयः किमुत शश्वदभद्रवृत्ताः॥ अहं महेन्द्रो निर्ऋतिः प्रचेताः सोमोऽग्निरी
शः पवनो विरिंचिः॥८८॥ आदित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः॥ अन्ये च ये विश्वसृजोऽमरेशा
भृगवाद्यो स्पृष्टरजस्तमस्काः॥८९॥ यस्येहितं न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोऽन्ये॥ सर्वस्यादौ स्मृतो ब्रह्मा
तस्माद्धि वादनंतरः॥९०॥ जानाति देवप्रवरं भेमस्यातो धिकं नृप॥ नत्वामति शापिष्यति मुक्तावपि कथंचन॥९१॥ मद्भक्ति
योगाद्धानाद्वा सर्वानति शयिष्यसि॥ यथा भक्तिविशेषो त्राहृद्यं यत्पुरुषोत्तमे॥९२॥ तथा मुक्तिविशेषोऽपि ज्ञानिनां लिं
गभेदने॥ सायुज्यं समनुप्राप्ता अपि देवा द्योर्विलाः॥९३॥ तारतम्याधितिष्ठंति तारतम्यं हि साधने॥ मनुष्याणां सह

स्रेषु कश्चिद्यतति सिद्धये॥९५॥ यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥ य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति॥९६॥
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः॥९७॥ भविता न च मे तस्मादन्यः
प्रियतरो भुवि॥ अध्येष्यते च य इमं धर्म्यं संवादमावयोः॥९८॥ ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥ श्रद्धावाननु
सूयश्च शृणुयादपि यो नरः॥९९॥ सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम्॥ ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना॥
॥१००॥ अन्ये सांख्येन योगेन कर्मयोगेन चापरे॥ अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते॥ १॥ तेऽपि चातितरंत्येव मृत्युं
श्रुतिपरायणाः॥ सुसूक्ष्मैरप्यशेषैश्च विशेषैः स हपश्यति॥२॥ स्वात्मानं भगवान्विष्णुः सर्वरूपोऽपि सर्वदा॥ सर्वत्र त्वात्मद
व्यं वर्तेनादृष्टं नहि कचित्॥३॥ सर्वत्र सर्वदेवेशं पश्यत्येव रमापि तु॥ न तु सर्वविशेषैस्तं पश्यत्यप्यन्यतोऽधिकं स्वात्मानमन्य
११५॥ च्च शेषं पश्यं स्त्वेव हि सर्वदा॥ ब्रह्मा तु सर्वगं पश्यद्गुणान्यप्यन्यतोऽधिकं न तु सर्वेषु कालेषु तथा पश्यत्यमुक्तिगः॥ मुक्तास्तु स
र्वदा पश्येत्सर्वगत्वं न चापि तु॥६॥ न रमावद्विशेषाणां दर्शनं स्याक्वचित्॥ स्वात्मानमन्यच्च सदा विशेषैरखिलैरपि॥७॥
पश्यत्यजस्तथा वाणी विशेषांस्तारतो नतु॥ त्रैगुण्यात्परतः पश्येत्स्वात्मानं शतगुणं हरिं॥८॥ गिरिशो गरुडश्चैव तमो भा
त्राकृतिं हरिं॥ पश्येद्विशेषानपि हि वाणी दृष्टान्न पश्यति॥२॥ उमा सुपर्णश्च महत्तत्त्वयावत्प्रपश्यति॥ रुद्रदृष्टान्विशेषांश्चैने

वपन्नयेत्कदाचन॥१०॥स्वरूपमन्यरूपंत्वमुक्तादेवाःसमरूपकाः॥जानंतीशश्चकामश्चब्रह्मायावदहंकृतिः॥११॥पश्यतो
मनुदक्षाद्यास्तुस्थितत्वस्थितंहरिं॥पश्यंतिसोमसूर्यौचमनश्चपरमेश्वरं॥१२॥अन्येभूतास्थितंविष्णुंदेवाःपश्यंतिसर्वदा॥
बहुसाहस्रवर्षाणांमहतस्तेष्वचित्कचित्॥१३॥अन्येचैवयथायोगमंतर्वर्तिनंहरिं॥श्वेतद्वीपपतिंचैवदृष्टवानेनतुकेचन
॥१४॥कदाचिदेवतत्रापिकेचित्पश्यंतिकेशवं॥उमायावदनंतांशानूर्ध्वदृष्ट्यापश्यतेतु॥१५॥विशेषान्वासुदेवस्यपश्यंत्यादुका
विचक्षते॥ कामादयश्चैवविशेषान्ब्रह्मणिस्थितान्॥१६॥उमादिभिःप्रबुद्धेभ्यः॥शतंज्ञानेनवचक्षते॥इत्यादिवेदस्मृ
तिगवचनेभ्योयथार्थतः॥१७॥तारतम्यंचमुक्तानांसाधनानांचदृश्यते॥साध्यसाधनवैरूप्यमदृष्टंकेनकल्प्यते॥१८॥
वैषम्यंनिर्घृणत्वंचतेनस्यातांतोपरस्यच॥सापेक्षत्वदितिंचेतौविद्यार्थीशेनवारितौ॥१९॥तारतम्यंसाधनानांसाध्यतादृक्
मीशतः॥अन्वेषम्यादिहेतुःस्यात्सदेवपरमेश्वरे॥२०॥स्यात्तेष्वविद्यमानेपिसाधनादौपरेशितुः॥अपेक्षणादिवैचित्र्यंन
दोषइतिलद्धुच॥२१॥नानादित्वादितिह्युक्तमुपपद्यतइत्यपि॥अपेक्ष्यवायदिवैचित्र्यनुपेयस्यात्तथास्थितिः॥२२॥मया
कयाविरुद्धस्याद्वाजादावपिदृश्यते॥स्यागोदृष्टस्यचादृष्टकल्पनेतिसुदुष्करौ॥२३॥मयिस्थोन्येनकेनापितत्किमन्येष्ववा
दिभिः॥मायिनोत्रानुगम्यतेश्रुतहान्यश्रुतग्रहौ॥२४॥अप्यत्रमायिनांलिंगेतत्केदोषास्ततोधिकाः॥विशेषगतदोषाणां
बहुभिर्जन्मभिःपुनः॥२५॥स्यादापरोक्ष्यंहिहरेर्द्वेष्याद्विस्ततःकुतः॥सर्वयुक्तिविरोधःसमेष्वपिकुतोनतत्॥२६॥

स्थितस्यानान्यथाभासिदृष्टिदृश्यतिचोदितः॥६३॥बलिष्टश्चस्वभावेनमुक्तोभवतिकेवलं॥तस्यैयंपृथिवीत्यादिपूर्वभावव्यपेक्षया॥
सदावदतिसंसारगतमुक्तास्मरत्वपुनः॥श्रोत्रियस्येतिवदतिमुक्ताच्छातगुणात्मनां॥६५॥संसारगात्स्वसंसारगतस्यैवशताधिके॥
मुक्तामुक्तस्ययुक्तंस्याच्छ्रुत्युक्तमभिवीक्षितः॥६६॥युक्तंचसाधनाधिक्यात्साध्याधिक्यंसुरादिषु॥नाधिक्यंयदिसाध्येस्यात्क्षय
त्वःसाधनैःकुतः॥६७॥येलक्षदृश्यतेतेषांमहानेवमहात्मनां॥यत्रसाधनबाहुल्यंसाध्यबाहुल्यमत्रच॥६८॥दृष्टनियमतोनोचे
न्नयत्नकुर्युरंजसा॥दुःखेणसाधनादेवनमुक्तयदुदीर्यते॥६९॥दशकल्पमतपश्चीरोरुद्रोलवणार्णवे॥त्यक्तासुखानिसर्वाणिदुः
कृष्टेनलवणांभसा॥७०॥शक्रोवर्षकोटिश्चधूमःपीतोतिदुःखितः॥वर्षायुतंचसूर्योपितपोवा… रसाहृतं॥७१॥सुदुखेनसु
खंत्यक्त्वाथमेरोगाकाशगोपिना॥पीतामरीचयोवर्षसहस्रमतिसादरं॥७२॥अतिकृच्छ्रेणकुर्वंतियत्नंब्रह्मविदोपिच॥इत्येतदखिलं
मोक्षेविशेषाभावतःकुतं॥७३॥देवीसत्यहिमोक्षायनिबंधायासुरीमता॥इतिमोक्षविशेषश्चस्वयंभगवतोदितः॥७४॥तमेवबु
यंभजतात्मवृत्तिभिर्मनोवचःकार्यगुणोस्वकर्मभिः॥अमायिनःकामदुघांघ्रिपंकजंयथाधिकारावसितार्थसिद्धये॥७५॥अक्ष
ण्वंतःकर्णवंतःसखायोमनोजवेष्वसमाबभूवुः॥आदघ्नासउपकक्षासउत्वेहृदाइवस्नात्वाउत्वेददृश्रे॥७६॥इत्यादीनिचवाक्या
नितारतम्यंविमुक्तिगं॥व्यक्तंवदंतितत्केनसाम्यंमुक्तेप्रगम्यते॥७७॥दुःखाद्यभावसाम्यंचसाम्यवाक्यार्थईर्यते॥भक्त्यादिगुण
सद्भावोप्यतुल्यस्तंचभारते॥उक्तसाधननैशेष्यअपिसर्वेचकथ्यते॥दुर्ज्ञेयघोररूपस्यत्रैलोक्यध्वंसिनःप्रभो॥७८॥देवतेमुनि

खंतु मुक्तानामपिनब्रह्मणोस्येवत् ॥ युक्तिः सुखस्यतु सर्वेभ्यस्त्वाधिक्यंसुखस्यच ॥४३॥ बलज्ञानाधिकत्वंचतेभ्योपिब्रह्मणः सदा
उ अधिक्यस्यत्वनित्यत्वेनकिंचिन्मानमीयते ॥४४॥ अथवे वीर्यमुद्यम्य अन्यमन्यमतिनेनीयमानः ॥ एधमानद्विउभयस्यराजाचे
ह्रूयतेविशांदेशोमनुष्यान् यतपूर्वैषांसख्याः वृणाद्विविनुसुराणो अपरेभिरेति ॥ अनानुभूतीरवधुन्वानः पूर्वइरिंदः शौरदस्रुत्सरीति ४६
